चतीति विग्रहे ऋत्विग्दधृगित्यादिना क्विन् प्रत्ययः तस्य सर्वलोपः अनिदितां
हल उपधायाः क्ङिति ॥ अनिदितां नाम्नां हलन्तानां उपधाया नकारस्य लोपो
भवति क्ङिति परतः गतिकारकोपपदादिना समासः सवर्णे दीर्घः प्राच् इति स्थिते स्वा
द्युत्पत्तिः हल्ङ्यादिलोपः ॥ उगिदचां सर्वनामस्थाने धातोरित्यनुमागमः क्विन्प्र
त्ययस्येत्यत्र वकारस्य ककारः नश्चापदान्तस्य झलीत्यनुस्वारः अनुस्वारस्य यि
परसवर्णः संयोगान्तस्य लोपः प्राङ् प्राञ्चौ प्राञ्चः संबोधने न विशेषः प्राञ्चं प्राञ्चौ
शसि तु असर्वनामत्वान्न नुम् भवति भसंज्ञाविषये ॥ अचः लुप्तनकारस्य अञ्चेः
स्थाने दीर्घो भवति प्राचः प्राचा प्राग्भ्यां प्राग्भिः प्राचे चोः कुः जश्त्वं प्राग्भ्यां प्राग्भ्यः
प्राचः प्राग्भ्यः प्राचः प्राचोः प्राचां प्राचि प्राचोः प्राक्षु ॥ तथैव प्रत्यक् एवं प्रत्यञ्चतेः क्वि
प्रत्ययश्च ॥ प्राङ्ः तस्य सौ प्रत्यङ् प्रत्यञ्चौ प्रति अञ्च् शस् इति स्थिते अचः इत्यकारलो
पः चौ इति इकारस्य दीर्घः प्रतीचः भसंज्ञाविषये जश्त्वं प्रतीचा । प्रत्यग्भ्यां प्रत्यग्
भिरित्यादि विशेषणे यं तथा तत्सर्वस्य अञ्चतेः क्विबन्तस्य तद्द्र्यञ्च् शब्दाः तद्र्यङ् उदञ्चौ
उदञ्चः संबोधनेऽपि तत्त्व उदञ्चं उदञ्चौ शसादावचि भसंज्ञायां उदः ईत् उदीचः शब्दाः

दे॰ पा॰ ५६

56

त्तरस्यलक्षणकारस्याञ्चतेः इत्यादेशो भवति स च आदेशोत्वरस्य परत्वविधीयमानं कार्यं
परस्य आदेशो भवति उदीचः उदीचा लक्लादौ जश्त्वं उदग्भ्यां उदग्भिः शेषं नेयं ॥ तथै
व तिर्यञ्चशब्दः तिरस्शब्दस्योपपदे तिरः अञ्चतीति विग्रहे कृते तथैव क्विन् शेषं पू
र्ववत् तिरस् अञ्च् इति स्थिते अञ्चेवयोश्चदेशेषु च भावो प्रत्यये इत्यपि कृत्य ॥ तिर
सस्तिर्यल्लोपे तिरस्शब्दस्य तिरि इत्यादेशो भवति । अञ्चतौ प्रत्यये परे तत्र परेश्च
लोपयत्र अचइति अकारलोपेन भवति इत्यर्थः यणादेशः तिर्यङ् तिर्यञ्चौ तिर्यञ्चः
सम्बोधनेप्येविशेषः तिर्यञ्चतिर्यञ्चौ भसंज्ञा विषये तिरि आदेशो न भवति अलोप
इति प्रतिषेधात् अचइति कारलोपः स्तोः श्चुनाश्चुः इति सकारस्य शकारः तिर
श्चः तिरश्चा तिर्यग्भ्यां तिर्यग्भिरित्यादि शेषं नेयं ॥ तथैव सम्यञ्चशब्दः सम्पूर्वस्या
ञ्चतेः समञ्चतीति विग्रहे तथैव क्विन् ॥ समःसमि ॥ समशब्दस्य समि इत्यादेशो भव
ति अञ्चतौ क्विन्प्रत्यये परे यणादेशः सम्यङ् सम्यञ्चौ सम्यञ्चः सम्बोधनेपि
तथैव सम्यञ्च सम्यञ्चौ भसंज्ञायां आमि अच् अस इति स्थिते अच इत्याकारलोपः चौ इ
ति दीर्घः समीचः समीचा सम्यग्भ्यां सम्यग्भिः शेषं नेयम् ॥ सहपूर्वस्याञ्चतेः ।
सहाञ्चतीति विग्रहे प्राग्वत् क्विन् सह अञ्च् इति स्थिते सहस्य सध्रिः ॥ सहाद्

दे॰ ५६

तेतस्य सध्रि आदेशो भवति अञ्चतौ वप्रत्यये तेऽञ्चरपदे यणादेशः सध्र्यङ् सध्र्यञ्चौ
सध्र्यञ्चः सध्र्यञ्चं सध्र्यञ्चौ भसंज्ञाविषये सध्रि अच् अस् इति स्थिते अच इत्यकार
लोपः चौ इति दीर्घः सध्रीचः सध्रीचा सध्र्यग्भ्यां सध्र्यग्भिरित्यादि शेषं नेयं यदा
अञ्चतिः पूजायामर्थे वर्तते तदा अग्र अञ्च् इति स्थिते नथवञ्चि ह्निन्प्रत्ययः ह्निनस्य वा
लोपः ॥ अनिदितां हल उपधायाः क्ङिति ॥ इति नकारस्य लोपे प्राप्ते नाञ्चेः पूजा
यामिति नलोपो न भवति ह्निन्प्रत्ययस्य नकारेति च सम्प्रत्ययः अनुस्वारवर्गान्तो संयोगा
न्तस्य लोपः प्राङ् प्राञ्चौ प्राञ्चः प्राञ्चा हलादि संयोगान्तलोपे कृते तत्त्व नकारस्य
ङकारः प्राङ्भ्यां प्राङ्भिः शेषं नेयं प्राङ् सु इति स्थिते ङ्णोः कुक्टुक्शरि ॥ ककारः प्रत्यय
मभिसंबध्यते ङकारणकारयोः कुक्टुक् इत्येतावागमौ भवतः शरि परतः अन्त्या
त्समान प्राङ्क्षु ङकारान्तो प्रसिद्धः उकारान्तो मरुत् शब्दः मरुत् मरुतौ मरुतः म
रुतं मरुतौ मरुतः मरुता मरुद्भ्यां मरुद्भिरित्यादि शेषं नेयम् भवत् शब्दस्य भेदः भ
वत् इति स्थिते उकारः उगित्कार्यार्थः स्वाद्युत्पत्तिः ॥ अत्वसन्तस्य चाधातोः ॥ अत्व
न्तस्यासन्तस्य च धातुवर्जितस्य दीर्घो भवति असंबुद्धौ सौ परतः नुमागमः एवं भवत्
भवान् भवन्तौ भवन्तः सम्बुद्धौ विभाषा भवत् भगवत् अघवत् नामोऽभ्याबस्य ॥ इतिन

रू॰ पा॰ ४७

47

कारस्य वा हत्वं अवयवस्य च डोकारः हे भोः हे भवन् हे भवन्तौ हे भवन्तः भवन्तं भवं
तौ भवंतः भवता भवद्भ्यां भवद्भिः शेषं नेयं एवं भगवदघवदित्येतो डकारानुबंधो ड
कारं तौ भगवन् भगवन्तौ भगवन्तः संबोधने नस्य रुत्वं अवस्य डोकारश्च विकल्पेन
स्याते हे भगोः हे भगवन् हे भगवन्तौ हे भगवन्तः एवं हे अघोः हे अघवन् शत्रन्तस्य भव
त शब्दस्य भेदः स च त्रिलिंगः भवत् इति स्थिते अकारलोपः प्रयोजनम् उगितश्चे
ति उगित्कार्यं कृदन्तत्वात् स्वाद्युत्पत्तिः हल्ङ्यादिलोपः उगिदचामिति नुमागमः १
संयोगान्तलोपः अत्वन्तस्यत्वाभावात् दीर्घो न भवति भवन् भवन्तौ भवन्तः हे भव
न् हे भवन्तौ हे भवन्तः एवं पचन् प्रभृतयः शत्रन्ताः संज्ञायां वर्तमाने लट् लटः श
अनुबंधलोपः एवं वत् कर्तरि शप् इति शप् प्रत्ययः जुहोत्यादेः श्लुः ॥ जुहोत्या
दिभ्य उत्तरस्य शपः श्लुः भवति एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्येत्यधिकृत्य ॥ १
श्लौ परे सत्य अनभ्यासस्य धातोः अवयवस्य प्रथमस्य एकाचो द्वितीयस्य वा यथायोगं द्वे भ
वतः दादा अत् इति स्थिते ॥ पूर्वोभ्यासः ॥ अस्मिन् प्रकरणे यद्द्वे विहिते तयोः पूर्वो यो वो
भ्याससंज्ञो भवति लोपोत्यातस्येति वर्तमाने ह्रस्वः अभ्यासस्य ह्रस्वो भवति सार्वधा
तुकमपित् ॥ सार्वधातुकं यदपित् इति ङिद्भवति त्रिभे प्रत्यये अस्मिन् प्रकरणे यद्दे

डो॰ ४७

विहिते नुत अपि सम्बद्धिते अभ्यस्तसंज्ञो भवति ॥ श्नाभ्यस्तयोरातः ॥ श्नाइत्येतस्य
अभ्यस्तसंज्ञकस्य च आकारस्य लोपो भवति सार्वधातुके क्ङिति परतः ददतु इति
स्थिते उगिदचामित्यादिना नुमि प्राप्ते नाभ्यस्ताच्छतुः ॥ अभ्यस्तात्परस्य शा
तुः नुमागमो न भवति ददत् ददतौ ददतः एवं दधत् प्रभृतयः ॥ अत्यामेचर्चे।
इति जक्षत्वमेव विशेषः जक्ष भक्ष हसनयोः जक्ष इति स्थिते अकारः परस्मैपदार्थः।
तथैव धातुसंज्ञायां लटः शत्रादेशः कर्त्तरि शप् तस्य अदिप्रभृतिभ्य इति लुक ज
क्षत् इति स्थिते स्याद्यत्यादिः सलोपः ॥ जक्षित्यादयः षट् जक्षित्याद्याः षट् धातवः
जक्षत्स्य अभ्यस्तसंज्ञा भवति नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः जक्षत् जक्षतौ
जक्षतः एवं जागृ निद्राक्षये दरिद्रा दुर्गतौ चकासृ दीप्तौ शासु अनुशिष्टौ दीधीङ्
दीप्तिदेवनयोः वेवीङ् वेतिना तुल्ये इत्येतेषां धातूनां लटः शत्रादेशे कृते शपो लु
कि कृते जाग्रत् दरिद्रत् शासत् चकासत् इत्यादीनामङ्किकलानां ददत्प्रत्यते
नां च धातूनामभ्यस्तसंज्ञायां तथैव नुमागप्रतिषेधे कृते शासतिहपभेदो ऽष्टम्
ककारएकारान्ताव प्रसिद्धौ णकारान्तः पुंलिंगः विश् शाहः स्वाद्युत्पत्तिः गलिप
रोते च अश्च स्वरज्ञित्यादिना षत्वं जश्त्वं चर्त्वं च विट् विषौ विषः शेषं नेयं ताहशः

हे॰ पां॰ ५५

शब्दस्य भेदः तथा तत्पुरुषप्रकरणात् दृशभः क्विरन्तः दृशिर्प्रेक्षणे इकाररेफयोः इत्संज्ञा
लोपः प्रयोजनं इरितो वेति विशेषणं तथैव धातुसंज्ञायां उपपदे अमिव पश्यतीति
विग्रहे त्यदादिषु दृशोनालोचने कञ्च त्यदादिषूपपदेषु दृशो धातोरनालोचने
वर्त्तमानात् क्विप्रत्ययो भवति चकारात् क्विन् च अनुबन्धलोपादि एवं वचनात् तत्
दृश इति स्थिते दृग्दृशवतुष्विति वर्त्तमाने आ सर्वनाम्नः ॥ दृग्दृशवतुषु परे
षु सर्वनाम्नः आकारादेशो भवति सवर्णदीर्घः स्याद्युत्पत्तिः क्विन्प्रत्ययस्य कुरिति
झलि पदान्ते च कुत्वं शकारस्य विकृतत्वं तस्याग्रहणस्याप्यसत्वात् प्रधानस्य दृशएव
खकारः कुत्वं तस्य जश्त्वं गकारः तस्यापि चर्त्वं ककारः तादृक् तादृशौ तादृशः
हे तादृक् शौ शः तादृशं शौ शः शा तादृग्भ्यां तादृग्भिः शेषं नेयं एवं यादृक् कीदृ
क् षकारान्ताः पुल्लिङ्गाः षष् शब्दः स्याद्युत्पत्तिः झलि पदान्ते जश्त्वं चर्त्वं च
तत्र दोषः शेषं नेयम् एवं द्विषित्यादयः षष् शब्दस्य भेदः तस्य बहुत्वार्थवाचित्वा
त् बहुवचनमेव भवति ष्णान्ता षट् इति षट्संज्ञायां षड्भ्यो लुक् जस्शसोर्लुक् रजा
सत्वे चर्त्वे च षट् षट् षड्भिः षड्भ्यः षड्भ्यः आमि षट्चतुर्भ्यश्चेति नुमागमः पूर्वस्य
पदसंज्ञायां नामिकत्वं नामिकत्वेनेति इकारस्य णकारः नकारस्य च ष्टुत्वेन णकारः

डं॰ ५५

रः पक्षापक्षस्व सकारांतः पुंलिंगः स्ववचं शब्दः स्वायव्यत्यिः अंत्वसंतस्यचाधातोः
रिति दीर्घः ॥ अन्यत्समानं स्ववचा स्ववचसौ स्ववचसः संबोधनस्यैवं स्ववचसम् ।
स्ववचसौ स्ववचसः स्ववचसा स्ववचोभ्यां स्ववचोभिः परसंज्ञायां कत्वं उणः शेषं नेयं
एवं स्वचितमनस्यात्यतयः श्रेयशब्दस्य भेदः सचोकारानुबंधः उगिदचां सर्व
नामस्थानेऽधात्वादिना नुं सांतमहतः संयोगस्य सकारांतस्य महतश्चोपधाया दीर्घो
भवति संबुद्धिवर्जिते सर्वनामस्थाने परतः श्रेयान् श्रेयांसौ श्रेयांसः हे श्रेयन् हे
श्रेयांसौ हे श्रेयांसः श्रेयांसम् श्रेयांसौ श्रेयसः श्रेयसा श्रेयोभ्यां श्रेयोभिः शेषं
नेयं एवं गरीयः पटीयःप्रत्यतयः शब्दाः उकारानुबंधाः सकारांताः ॥ उशनश्श
ब्दस्य भेदः तस्य सौ ऋदुशनस्पुरुदंसोऽनेहसां चेत्यनङादेशः अन्यत्समानं उशना
उशनसौ उशनसौ हे उशनः संबुद्धिविषये अनङिष्यते हे उशनन् नलोपो पिपः
तेऽप्यते हे उशन तथा चोक्तं संबोधनं चोशनसस्त्रिरूपं नांतं तथा सांतमथाप्यदं
तं माध्यंदिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः शेषं नेयं पुरुदंसन् अने
हस् इत्येतयोश्च तथैव रूपविधिः शब्दस्य भेदः विरत्वानेत्यः सान्तं वेवत्त लह
शब्दादेशः कर्तरि गतस्य तक प्रत्ययलत्त्वणेन गुणोप्राप्तेन लमनागस्येति मात्

निमित्ते गुणे प्राप्ते सार्वधातुकमपित् इति सार्वधातुकङित्वात् क्ङिति चेति प्रतिषेधः वि
देः सार्वधातुकमपित् इति वसुः विदेःशतुर्वसुः शतुः वसुरादेशो भवति उकारः वसोः संप्रसा
रणमिति विशेषणार्थः विद्वस् इति स्थिते स्याद्युत्पत्तिः स्वादि सर्वनामस्थाने ऽगिदचां सर्वनाम
स्थानेऽधातोः इति नुमागमः सान्तमहतः संयोगस्येति दीर्घः विद्वान् विद्वांसौ विद्वांसः हे वि
द्वन् हे विद्वांसौ हे विद्वांसः विद्वांसं विद्वांसौ शसादावजादौ वसोः संप्रसारणं वस्वन्तस्य
भस्य गस्य संप्रसारणं भवति संप्रसारणाच्चेति पूर्वरूपत्वं षत्वं विदुषः विदुषा हलादौ
वसुस्रंसुध्वंस्वनडुहां दः इति सस्य दः विद्वद्भ्यां विद्वद्भिः विदुषे विद्वद्भ्यां विद्वद्भ्यः एव
मेव रहतपंचिवदस् प्रत्ययः पुंस् शब्दस्य भेदः स्वाद्युत्पत्तिः पुंसोऽसुङ् शब्दस्य स
र्वनामस्थाने परे असुङ् आदेशो भवति उकारङकारौ अनुबन्धलोपः उगिदचामित्यादिना नुम् सा
न्तमहतः संयोगस्येति दीर्घः हल्ङ्यादिलोपः संयोगान्तलोपश्च पुमान् पुमांसौ पु
मांसः पुमांसं सौ सः पुंसा संयोगान्तलोपः पुंभ्यां पुंभिः पुंसे पुंभ्यां पुंभ्यः पुंसः पुंभ्यां
पुंभ्यः पुंसः पुंसोः पुंसां पुंसि पुंसोः पुंसां पुंसि पुंसोः पुंसु ॥ अदस् सर्वनामत्वात् त्रिलिंगः
अथ पुंल्लिंगः तत्रादौ पुंनयः स्वाद्युत्पत्तिः अदस् सौ सलोपश्च अदसः सोः परतः औकारा
देशो भवति सलोपश्च तदोः समावन्त्ययोरिति दकारस्य सकारः केचित् सकारं कृत्वा

स्लोपं कुर्वंति असौ अन्यत्र त्यदाद्यत्वपररूपत्वे वृद्धिः अदसो मे दादुदोमः ॥ अदसः
अकारस्य संबंधिनो दकारात्परस्य सवर्णमात्रस्य मकारादेशो भवति दकारस्य मकार
स्य उकारः प्रयोगानुसारेण एकमात्रस्य एकमात्रः द्विमात्रस्य द्विमात्रः इति दीर्घो भ
वति प्रथमाद्यो: एवं सर्वत्र: अथ बहुवचने त्यदाद्यत्वे जसः शी गुणः अदे इति स्थिते उ
तरे बहुवचने अदसः सकारस्य संबंधिनो दकारात्परस्य बहुवचनोत्पन्नस्य एका
रस्य ईकारादेशो भवति दकारस्य च मकारः अमी अमिं एवं बहुत्वे एवं रूपत्वं च अ
मु अमू अमून् तृतीयैकवचने घिसंज्ञायां नाभावः अमुना नत्वं च एवं वा सिद्धे द्विमित्व
स्य त्रस्यासिद्धत्वात् नाभावो न प्राप्नोति नैष दोषः अमुनेना भावे कृते अमुभावो नासि
द्धो भवतीति प्रतिषेधात् भवत्येवत्यामित्रत्वे दीर्घत्वं च कृते आन्तरतम्याद् दीर्घ ऊकारः
रस्य मः अमूभ्यां भिसि अत्वे कृते ऐसि प्राप्ते नेदमदसोरकोरिति प्रतिषेधः पश्चादेत्वम्
एत ईद्बहुवचने इति ईत्वे मत्वे च अमीभिः ङिस्तु उत्वयोरसिद्धत्वात्सर्वनाम्नः स्मै इति
स्मैभावः अमुष्मै अमूभ्यां अमीभ्यः अमुष्मात् अमूभ्यां अमीभ्यः अमुष्य अमुयोः अमी
षां अमुष्मिन् अमुयोः अमीषु ॥ हलन्ताः पुल्लिंगाः समाप्ताः ॥ अथ हलन्ताः स्त्रीलि
गाः हकारान्तः स्त्रीलिंगः उपानह् शब्दः उपपूर्वात् नह बंधने इत्यस्मात् एवं वन्विप्

ह॰ पां॰ ५१

51

अनुबंधलोपः एवंवत् नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ नहादिषु क्विप्प्र
त्ययांतेषु परभूतेषु उपसर्गाकारस्य दीर्घो भवति स्वाद्युत्पत्तिः नहपः नहोहकारस्य ध
कारादेशो भवति झलिपरतः पदांते च जश्त्वं च अन्यत्र सहिते उपानत् उपानहौ उपा
नहः संबोधनेपि तद्वत् उपानहा उपानद्भ्यां उपानद्भिः शेषं नेयं यकारांतः स्त्रीलिंगो
अप्रसिद्धः वकारांतः स्त्रीलिंगः स्त्रिदिवुशब्दः तस्य पुंलिंगः स्त्रिदिवुशब्दवत् रूपनयः रे
फांतः स्त्रीलिंगः गिर्शब्दः गृणातिगिरतेर्धातुसंज्ञायां क्विप् अनुबंधलोपः ॠत इद्धातो
ऋकारांतस्य धातोः इकारादेशो भवति क्ङिति परतः तस्य रपरः स्वाद्युत्पत्तिः वोरुप
धाया दीर्घ इकारः रेफवकारांतस्यांगस्योपधाया इको दीर्घो भवति झलि पदांते च रेफस्य
विसर्जनीयाः ॥ गीः गिरौ गिरः एवमन्येपि नेतव्याः चयः चतुर्शब्दस्य भेदः तस्य सा
वेत्रि चतुरो स्त्रियां तिसृ चतसृ इति चतसृ आदेशः अचि र ऋतः इति रेफादेशः चतस्रः
चतस्र चतसृभिः चतसृभ्यः चतसृभ्यः चतसृणां नामीति दीर्घे प्राप्ते न तिसृ चतसृ इ
ति प्रतिषेधः चतसृषु ॥ लकारजकारांतावप्रसिद्धौ मकारांतः स्त्रीलिंगः किंशब्दः
स्वाद्युत्पत्तिः सर्वत्र किमः कादेशो कृते आङ्याद्युत्पत्तिः दापि च कृते स्त्रीलिंगसर्वेश
ब्दवद्रूपनयः इदंशब्दस्य भेदः सो इदमोमः इदंशब्दमेवंपिनो हकारस्य यकारादेशो भ

डे॰ ५१

वतिसौपरे हल्ङ्यादिलोपः इयं अन्वत्तत्वनाद्यहम् अञ्जयउस्मान् तवर्णेदीर्घेः इत्ये
तिहकारस्यमकारः ङेङः शीभावादिइमेइमा आङिअनाप्यकः अनादेशः एत्वे
अयादेशः अनयाहलिलोप अभ्यैआभ्या आभ्यः आभ्याः आभ्योआभ्यः अनयोः आ
सां अस्यां अनयोः आसु ॥ अन्वादेशविषये एनादेशः एना एते एनाः एनया एनयोः
जकारणकारांतावप्रसिद्धौ नकारांताः स्त्रीलिंगः सीमन् शब्दः तस्य राजन् शब्दव
द्रूपनयः एवंपापन्क्षामन्त्वड्राजन्प्रत्तनयः संख्याशब्दाः पंचादयः नकारांताः स्त्री
षांतलिंगवद्रूपनयः फकारांतोप्रसिद्धः भकारांतः ककुभ शब्दः तस्य झलिपदांते ।
वजभत्वअवसानेत्वं ककुप् ककुभौ ककुभः शेषंनेयं यढकारांतावप्रसिद्धौ धका
रांतः स्त्रीलिंगः समिध् शब्दः तस्यापि विशेषः समित् समिधौ समिधः शेषंनेयं एवंवी
रुधादयः जकारांतः स्त्रीलिंगः सज् शब्दः तस्य भिषज् शब्दवद्रूपनवः बगडान्ताअप्र
सिद्धः रकारांतः स्त्रीलिंगो द्वार् शब्दः तस्यापि विशेषः द्वाः द्वारौ द्वारः एवं
पुरसंपद्धिपदादयः उह् शब्दस्य भेदः अहेच्छ तस्यापु सौ तुदोः समावनन्यषोरिति उ
कारस्य मकारः हल्ङ्यादिलोपः सो अन्यत्सर्वा शब्दवत् नेताः इत्यादि एवं यड् एनः
द्वाहौ विफच्छठथान्ता अप्रसिद्धाः चकारांताः स्त्रीलिंगः त्वच् शब्दः तस्य चो कुरिति

ह्रु॰ पा॰
५२
52

ऊर्त्वं त्वक् त्वचौ त्वचः शेषं नेयं एवं वाच्शब्दः चकारांतो प्रसिद्धः ऊकारांतः स्त्रीलिंगः
विद्युत्शब्दः तस्य एवं वस्त्रक्रियाक ककारांतो प्रसिद्धः पकारांतः स्त्रीलिंगः अप्शब्दः
तस्य बह्वर्थवाचित्वात् बहुवचनमेव भवति जसि अप् इति स्थिते नादीर्घे आपः शसि त्वा
सर्वनामस्थानत्वात् दीर्घो न भवति अपः भकारादौ अपो भिः अपः पकारस्य दकारादेशो भ
वति उकारादौ प्रत्यये परे जश्त्वं अद्भिः अद्भ्यः अद्भ्यः अपां अप्सु। शकारांतो दृश्शब्दः
दृशादेः तो ऽन्यस्मात् क्विबंतः एवं बत्क्विनः सर्वलोपः स्यात् क्विन्प्रत्ययस्य कुरि
ति कुत्वं शकारस्य ककारः दृक् दृग् दृशौ दृशः दृशा दृग्भ्यां दृग्भिः शेषं नेयं षकारां
तः त्विष्शब्दः तस्य पुंलिंगवत् त्विष्शब्दवद्रूपं नयः सकारांतः स्त्रीलिंगः सुवचस्शब्दः त
स्यापि पुंलिंगः सुवचः शब्दवद्रूपं नयः सकारांतः स्त्रीलिंगः सुवचस् शब्दः तस्यापि पुंलिं
ग सुवचः शब्दवद्रूपं नयः अदस्शब्दस्य भेदः तस्य सो पुंलिंगवत् असौ अमू त्यदाद्य
त्यपरह्यपह्वयोः हृतयोः टाप् शीभावाद अदसो मेदात् दोमः एवं सर्वाणि दीर्घः अमू अमू
अमूः आङि एत्वं अयादेशः अमुया अमूभ्यां अमूभिः ङिद्विवचने सर्वनाम्न्या ङस्त्वस्य
अमुष्यै अमूभ्यां अमूभ्यः अमुष्याः अमूभ्याम् अमूभ्यः अमुष्याः अमुयोः अमूषां अमुष्याम्
अमुयोः अमूषु ॥ इति हलंतास्त्रीलिंगाः ॥ अथ हलंता नपुंसकलिंगाः ॥ तत्र हयवाना

उ॰
५२

प्रसिद्धाः रेफान्तो नपुंसकलिंगश्चतुरशब्दः स्याद्युत्पत्तिः जस्शसोः शिः चतुरनडुहो
रामुदात्तः यणादेशः चत्वारि शेषं पूर्ववत् वार्शब्दस्य भेदः स्याद्युत्पत्तिः स्वमोर्नपुंसका
दिति स्वमोर्लुक् रेफस्य विसर्गः शीभावे शिभावे वा वाः वारी वारि एवं वध्रीभाव शिभावो
पुनरप्येवाः वारी वारि हेवाः हे वारी हे वारि शेषं पूर्ववत् वारा वार्भ्यां वार्भिः वारे वार्
भ्यां वार्भ्यः शेषं नेयं लकारजकारान्ताव प्रसिद्धौ मकारान्तो नपुंसकलिंगः किंशब्दः स्या
द्युत्पत्तौ स्वमोर्लुक् प्रत्ययलक्षणेन कादेशे प्राप्ते न लुमताङ्गस्येति प्रतिषेधः कादेशे कृते
शीभावे किं कानि पुनरप्येवं शेषं पूर्ववत् शब्दस्य भेदः स्याद्युत्पत्तौ स्वमोर्लुक् प्रत्यय
लक्षणेन इदमिति इकारस्य मकारादेशो न भवति न लुमताङ्गस्येति प्रतिषेधात् इदं पुन
रप्यव्ययत्वप्रकृतिरूपत्वे इदमिति मकारः शीभावे इमे इमानि २ शेषं पूर्ववत् ङकारणकारां
न्ताव प्रसिद्धौ नकारान्तो नपुंसकलिंगः चर्मन्शब्दः स्याद्युत्पत्तौ स्वमोर्लुक् नलोपः
चर्म पुनरपि शीभावे अभसंज्ञायां विभाषा ङिश्योरिति अल्लोपे प्राप्ते न संयोगाद्वमन्तादिति प्र
तिषेधः चर्मणी चर्माणि पुनरप्येवं शेषं पूर्ववत् सर्वोपि नतन्यापि ॥ एवं कर्मन्वर्मन्प्रभृ
तयः अहन्शब्दस्य भेदः स्याद्युत्पत्तिः स्वमोर्लुक् सम्बुद्धौ नकारस्य ... अहन् अह
न् शब्दस्य पदस्य रुर्भवति ... रेफस्य विसर्गः अहः ओङि विभाषा ङिश्योरिति

अल्लोपः अक्ष्णी वा अक्षी अक्षाणि पुनरप्येवं शेषं पुंवत् अस्थ्नादिषु हलादौ परे संज्ञायां अहन्
इति स्थिते रुत्वं उत्वं गुणश्च अहो अहोभ्यां अहोभिः शेषं नेयं पंचादीनां नकारांतानां नपुंसक
लिंगानां पुंवद्रूपनयः जगच्छ्म जन्मगादीनां अप्रसिद्धाः तत्रापि विशेषं दकारांतानां न
पुंसकलिंगानां त्यच्छब्दः स्वाद्युत्पत्तिः स्वमोर्लुक् प्रत्ययलक्षणेन त्यदाद्यत्वे प्राप्ते न लुम
तांगस्येति प्रतिषेधः अन्यत्र त्यदाद्यत्व अभावादित्तत् तेतानि पुनरप्येवं शेषं पुंवत् तत्
यैवयद् एतद् एतदोऽपि एवं च यो अप्रसिद्धाः चकारांतो नपुंसकलिंगः प्राच्छब्दः
स च पूर्ववत् सिद्धे नंतः स्वाद्युत्पत्तिः स्वमोर्लुक् नात्वं भसंज्ञायामवस्यकारलोपः चावि
तिरश्चः प्राक् प्राची प्रांचि पुनरप्येवं शेषं पुंवत् शेषं नपुंसकस्य फलं च उत्वेन अनुस्व
रपरसवर्णो शेषं पूर्ववत् एवं प्रत्यच् उदच् तिर्यच् सम्यच् प्रभृतयः इकारांतो अप्रसिद्धः उ
कारांतो शकृत् शब्दः स्वाद्युत्पत्तिः स्वमोर्लोपः शकृत् शकृती शकृंति पुनरप्येवमस्य शे
षं नेयं अस्य तकारांतानां भेदः पूर्ववत् ददत् इति स्थिते स्वाद्युत्पत्तिः ददत् द
दती जसि शसोः शि इति शिः नपुंसकस्य झलच इति नुमि प्राप्ते नाभ्यस्ताच्छतुरिति
निषेधे नपुंसकस्य नपुंसकस्य सर्वनामस्थाने वा नुमागमो भवति ददंति
ददति इति ॥ ब्राह्मणकुलानि पुनरप्येवं एवं द्विकज्ञानां धातुनां जक्षत्यादीनां च पुंवत्

तत्र द्वयेनाभ्यस्तसंज्ञायां विषये रूपभेदः स्वाद्युत्पत्तिः अनभ्यस्तसंज्ञायामपि सान्ता
नां रूपभेदः एवं दधात् इति ऋकार उगित्कार्यार्थः दत् अंतत्वात् प्रातिपदिकसंज्ञायां स्या
द्युत्पत्तिः धात्विति द्विवचने आच्छीनद्योर्नुमिति वा नुं दधती वा याती शो नपुंसकस्य झलचः
इति नुं पुनरप्येवं शेषं पुंवत् एवं पचत् प्रभृतयः भवत्य इति स्थिते ऋकारः उगित्कार्यः
स्वाद्युत्पत्तिः स्वमोर्लुक भवत् द्विवचने शप्श्यनो नित्यमिति नुमागमः भवन्ती वा भवंती शे
षं पूर्ववत् एवं देवयत् प्रभृतयः एवमस्मिन्नर्द्धद्वये रूपभेदेन षडन्ता दृष्टव्याः ककार षका
रणकारान्ता अप्रसिद्धाः षकारान्ता नपुंसकलिंगाः षष् शब्दः तस्य पुंलिंगवद्रूपनयः
सकारान्तः पयस् शब्दः स्वाद्युत्पत्तिः रुत्वविसर्गौ पयः पयसी पयांसि एवं वन्नदीर्घः नश्वा
पदान्तस्य रुत्वोत्वाभ्यामनुस्वारः शेषं नेयं एवं तेजस् यशस् वचस् वयस् प्रभृतयः अदस् श
ब्दस्य भेदः स्वाद्युत्पत्तिः स्वमोर्लुक इत्वविसर्गौ अदः अन्यत्र त्यदाद्यत्वं पररूपत्वं च अदे
रमेमादूदोसः इति मत्वं सत्वं च अमू अमूनि पुनरप्येवं शेषं नेयं ॥ इति हलन्ता नपुंस
कलिंगाः समाप्ताः ॥ अथ हलन्ते स्त्रीलिंगे युष्मदस्मच्छब्दौ पुंवच्च तेतयोऽस्या लिंगत्वात् त्रिषु
लिंगेषु समानं रूपं कथं त्वं पुमान् त्वं स्त्री त्वं नपुंसकं अहं पुमान् अहं स्त्री अहं नपुंसकं
युष्मदस्मदोरिति स्थिते तथैव स्वाद्युत्पत्तिः युष्मदस्मदोर्ङसोमोऽशित्यपि त्वाहं प्रथमयो

रन ॥ युष्मदस्मद्योरनन्तरस्य ङे इत्येतस्य प्रथमाद्वितीययोश्च विभक्त्योः अमादेशो भव
ति मपर्यन्तमेत्यपि कृत्वाहाहेमो युष्मदस्मदोः परस्यमो परतः इ अह इत्येतावादेशौ
यथासंख्येन ॥ शेषे लोपः शेषविभक्त्यौ परतः युष्मदस्मदोः दकारस्य लोपो भवति य
त्र विभक्तौ वचनं मात्वं चनाभिहितं स शेषः अमिद वं इति प्रवदूपत्वं त्वमहं नयेव द्विव
चनस्यादेशः युवावौ द्विवचने युष्मदस्मदोः मपर्यन्तस्य द्विवचने परतः युव आव आदे
शौ भवतः अष्टन आ विभक्तौ वित्यपि कृत्वा युष्मदस्मदोरगागादेशो इत्यन वर्तमाने प्रथ
मायाश्च द्विवचने भाषायां ॥ प्रथमाया द्विवचने परतः युष्मदस्मदोराकारादेशो भवति
भाषायां सर्वत्राष्टीणां अमिद वं त्वंयु वा आवां जसस्त्येव अमादेशो हाते यूयं वयं जसि
युष्मदस्मदोः पर्यन्तस्य यूय वय इत्येतावादेशौ भवतः जसि परतः शेषे लोपः अमिद वं त्व
यूयं वयं अमेपि तथैवामादेशः त्वमाएकवचने युष्मदस्मदोर्मपर्यन्तस्य चैकवचने त्वम
इत्येतावादेशौ भवति द्वितीयायां च द्वितीयायां विभक्तौ परतः युष्मदस्मदोराकारादेशो
भवति सर्वत्रदीर्घः अमिद वं इत्यस्य एवं त्वं मा द्विवचने एवं युवां आवां भवतः द्वितीयो
चेत्यात्वं त्वद्वां आवां शसो सि प्राप्ते युष्मान् अस्मान् ॥ युष्मदस्मद्भ्यां अनन्तरस्य शसः नकारादे
शो भवति सचादेः परस्य परस्य विधीयमानं कार्यं परस्यादेरकारस्य भवति द्वितीयायां

वेत्यात्वत्वंसवर्णोदीर्घः संयोगांतस्यलोपः युष्मान् अस्मान् तृतीयैकवचनेत्वमावे
कवचनेइतित्वमौभवतः युष्मदस्मदोरणादेशइतिवर्तमानेयोचि युष्मदस्मदोर्द
कारस्ययकारादेशोभवति अनादेशोअचिविभक्तौपरतः त्वयामयासवर्णोदीर्घः त्वामि
यवौभवतः युष्मदस्मदोरनादेशेआकारादेशोभवतिविभक्तौपरतः सवर्णोदीर्घः ।
युवाभ्याआवाभ्यां भिसियुष्मदस्मदोरनादेशोउत्यात्वंसवर्णोदीर्घः युष्माभिः अस्मा
भिः चतुर्थ्येकवचनेङेप्रथमयोरमित्यत्वमभ्यमह्यांङयिः युष्मदस्मदोन्त्यपर्यंतस्यङेप्र
त्ययेपरेतुभ्यमह्याइत्येतावादेशौभवतः शेषेलोपः आमिट्वत्वं तुभ्यंमह्यंद्विवचने
युवाभ्याआवाभ्यांबहुवचने ॥ त्वमोत्यम युष्मदस्मभ्यांउत्तरस्यभ्यसोभ्यमादेशोभ
वतिशेषेलोपः युष्मभ्यं अस्मभ्यं अस्मभ्यं अगवृत्तेउनदेतोवविधितिष्ठितस्येतिव
चनात् एत्वंनभवति पंचम्याअदित्यधिकृतिएकवचनस्यचयुष्मदस्मद्भ्यांउत्तरस्य
पंचम्येकवचनस्यअदादेशोभवति त्वमावेकवचने शेषेलोपः पररूपत्वं त्वत् मत्
युवाभ्यां आवाभ्यां ॥ पंचम्याअत् युष्मदस्मद्भ्यांउत्तरस्यपंचम्याभ्यसः अदित्ययमा
देशोभवतिशेषेलोपः अतोगुणेइतिपररूपत्वंयुष्मत् अस्मत् षष्ठ्येकवचनेयु
ष्मदस्मद्भ्यांङसोअ अस्मदस्मद्भ्यांउत्तरस्यङसःअदित्ययमादेशोभवति अकारस्यबोदेः

दै॰
पा॰
५५
55

र्थे॥ तत्र समानस्य युष्मदस्मदोरन्त्यः पदं तस्य तवममेत्येतावादेशौ भवतः ङसि
परतः शेषे लोपः परह्रूपत्वं तव मम ङेस्थित्य वावौ भवतः यो विकृतिर्यकारः कवयो
अवयोः आमि शेषे लोपः कस्य शेषः पंचम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि यान्यहि
वचनान्यत्र शेषे लोपः विधीयते आमि सर्वनाम्नः सुडिति सडागमः साम आकं युष्
मदस्मद्भ्यां परस्य साम आकमादेशो भवति सवर्णे दीर्घः युष्माकं अस्माकं ङेतथै
व त्वमौ भवतः यो विकृतिर्यकारः त्वयि मयि ङेस्थितयवयोः आवयोः सप्तमी युष्मदस्मदो
रन्त्यादेशः इत्यात्वं सवर्णे दीर्घः युष्मासु अस्मासु अन्तानामेयोरेवास्मदस्मदोः षष्ठीच
तुर्थीद्वितीयास्थयोः क्वचिदादन्त्यान्तर विधानान्नेह पुत्रो युवयोः स्वम् पुत्रो आवयोः
स्व राजा युवाभ्यां दास्यति राजा आवाभ्यां दास्यति शिवो वो युष्माकं रक्षतीति शिव आवां र
क्षतीति पदं स्थितेन परस्य पदात् अन्यथा न स्मवेस्मादादा वित्यपि कृत्वा षष्ठीचतुर्थीद्विती
यास्थयो धानावोषु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः पदात्परयोः यावदादेशो वर्त्त
मानयोः वांनौ इत्येतावादेशौ भवतः यथासंख्येन संहितायां आवां पुत्रो वां दास्यति पु
त्रो नौ दास्यति शिवो वां रक्षतीति शिवो नौ रक्षतीति तथैव बहुवचनान्तयोः तस्मिन्नेवाधि
कारे युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावित्यपि कृत्वा बहुवचनस्य वस्न

ङो॰
५५

मे ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाबहुवचनान्तयोः वस्नसौ इत्येतावादेशौ
भवतः यथासंख्येन वांनावादेरपवादः पुत्रो वः स्वं पुत्रो नः स्वं पुत्रो नो दास्यति पुत्रो
वो दास्यति पुत्रो वो रक्षति पुत्रो नो रक्षति ॥ तथैवैकवचनान्तयोः युष्मदस्मदोः षष्ठी
चतुर्थ्येकवचनान्तयोः पदात्परयोः अपादादौ वर्तमानयोः तेमे इत्येतावादेशौ भ
वतः यथासंख्येन संहिता पुत्रस्ते स्वं पुत्रो मे स्वं पुत्रस्ते दास्यति पुत्रो मे दास्यति त्वामौ
द्वितीयायाः द्वितीयैकवचनान्तयोः युष्मदस्मदोः त्वामा इत्येतावादेशौ भवतः संहिता
पुत्रस्त्वा रक्षतु पुत्रो मा रक्षतु सर्वं पूर्ववा ॥ नावादयो द्वारेण विषये विभाषा वक्तव्ये
ति वचनाद्विकल्पेन भवन्तीति तेन कम्बलस्ते स्वं कम्बलस्तव स्वं कम्बलो मे स्वं कं
बलो मम स्वं अन्वादेशे तु इति किं अथो ते ग्रामः अथो मे ग्रामः ॥ न च वा हाह एवं ते ॥ १
च वा ह अह एव इत्येतैः ॥ युक्तयोः पदात्परयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया
स्थयोः वांनावादयो न भवन्ति पुत्रो युवयोश्च स्वं पुत्र आवयोश्च स्वं पुत्रो युवाभ्यां च
दास्यति पुत्र आवाभ्यां च दास्यति युवां च रक्षति आवां च रक्षति एवं वा ह अ
ह एव इत्येतैर्योगे मतिनेयं पश्यार्थैश्चानालोचने चक्षुषा दर्शनम् आलोचनं न आ
लोचने अनालोचने ज्ञानार्थैरनालोचने वर्तमानैर्योगे युष्मदस्मदोर्वांनावा

स्येकम्भवति ग्रामस्तव स्वयं समेत्यागताः मम स्वं मह्यं दीयमानं समीत्यागतः
तुभ्यं च ग्रामः स्वं समीत्यागतः मां च अनालोचने इति किं उपः स्वां पश्यति मां पश्य
ति ॥ अथ लिङ्गाव्ययविभक्तिभेदास्त्रिसंख्यानि विधानि न व्ययत्वेः सर्वतानीति ।
संक्षेपेणाव्ययं प्रपंचेत तथा चोक्तं सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु च
सर्वेषु यन्न व्येति तदव्ययं ॥ अथ स्वरादिनिपातमव्ययम् स्वरादयश्च निपाताश्चाव्ययसंज्ञा
भवन्तीत्यर्थः के पुनः स्वरादयः स्वर् अन्तर् प्रातर् पुनर् उच्चैस् नीचैस् शनैस् ऋते युग
पत् आरात् पृथक् तिरस् ह्यस् श्वस् दिवा सायम् दिवा सनाक षत् आह्वहिस्
स्वयम् नक्तम् सामिचित् अन्तरा विना नाना स्वस्ति अस्ति दोषा मिथ्या उपांशु
घस् बडस् मडस् मारस् मात्वम् अभीक्ष्णम् प्रायःस् अन्यताश्च ब्राह्मणाव
त्ति त्रिषु वरित्येवमादयः स्वरादयः तत्र स्वरित्येतस्मात्स्याद्युत्पत्तिः प्रथमैकवचनं सत
स्याद्ययाप्तत्र पठति लुग्विधानात्सर्वत्रैवं रूपं एवमेवमन्यस्मादपि तथा च स्व
निपातसंज्ञकाः च वा ह अह एव एवं नूनं शश्वत् चेत् नञ् साद् यत्र तत्र हन्त
अमानो नाप्रतिषेधे वषट् स्वाहा ॐस् तथा यदि हिरुक् खलु अथस् सत्यावृ
त् नावत् किल किं स्म उत धिक् हा हाहो आहो स्वित् ननु अहो अथो इति मन्य

नन्वयं अपस्त जात कथंजनः यतः तः ततः यदा तदा अये स्वग अंग कच्चित् ।
अये अरे भूयं अले हेमत्तइ उरस्त तरस्त कामस्त आ आं स आस्य तर्हि नहि अंत
रेण रह अत्र रे सपदिमामास्म इ उपसर्गविभक्तिस्वरप्रति रूपकाश्चादयः प्रत्ययान्या
त्यतिः प्रायी श्रुतान्निपाताइत्यधिकृत्य चादयो सत्त्वे सत्त्वे द्रव्ये असत्त्वे अर्थेवर्त
मानाश्चादयोनिपातसंज्ञाभवंतीति निपातसंज्ञायां स्वरादिनिपातमव्ययमित्यव्यय
संज्ञायां अव्ययादाप्सुपइति सुः लुग्भवति ॥ इतिविभक्त्यवतारः समाप्तः ॥ अ
थस्त्रीप्रत्ययानिर्दिश्यंते ॥ प्रत्ययपरश्चङ्याप्प्रातिपदिकात्स्त्रियामित्यधिकृत्य ।
अजाद्यतष्टाप् ॥ अजादित्योत्वकारांतात्प्रातिपदिकात्स्त्रियांटाप्प्रातिपदिकादित्य
नातिपकारेस्यग्रहणंनस्यात् टकारलोपः प्रयोजनं आबितिसामान्यग्रहणावि
घातार्थः असतिहितस्मिन्नेकारानुबंधग्रहणेनद्व्यनुबंधकस्येत्यस्यैवग्रहणंस्यात्
नडाप्चापोः अकः सवर्णेदीर्घः एडका अजा कोकिला अश्वा च टका वडवा मूषि
का बाला वत्सा इत्यजादयः अजादयः अकारांतात् स्तोसत्ता जाया जाया बाले
वृद्धा मलिका मत्तिका पिपीलिका क्षत्रिया ज्वालामाला देवदत्ता इत्यादयः सर्वे ।
अजादिग्रहणात्किं बहवोराजानोयस्यांनगर्यांइतिविग्रहे अनेकमन्यपदार्थेइतिब

बृं पां ५७

57

बहुव्रीहिः सुपो धातुप्रातिपदिकयोरिति सुपो लुक् सीमन् बहुराजन् इत्येवं स्थितेः
अनो वा ङीप् इति ङीपि प्राप्ते न षट्स्वस्रादिभ्य इत्यधिकृत्य मनः मन्नन्तात्प्रातिपदिकात् स्त्रियां
ङीप्प्रत्ययो न भवति ननु स्त्रियामित्यधिकृत्य डाबुभाभ्यामन्यतरस्यां मन्नन्तात्प्रातिपदि
कात् अनन्तात् च बहुव्रीहेः स्त्रियां डाप्प्रत्ययो भवति अन्यतरस्यां डकारलोपः प्रयोजनं
टेर्विंशतेर्डितीति विशेषणार्थः पकारः स चाभ्यग्रहणार्थः यचि भमिति एवं सति भसंज्ञायामग्र
स्य भस्याटोलोपो नस्तेर्विंशतेर्डितीत्यधिकृत्य टेः डिडिति प्रत्यये परे भसंज्ञकस्य टेः लोपो भ
वति सीमा सीमा बहुराजा अन्यत्र राजन्शब्दवत् ऊरुशब्दात् एकवचने गन्धशब्दात्
थमैकवचने ऊरुरस्येव गन्धो यस्येति विग्रहे अनेकमन्यपदार्थे इति बहुव्रीहिः सुपो लु
क् उत्तरपदलोपो नाम प्रयोग इति इवशब्दस्य लोपः ऊरुगन्ध इति स्थिते गन्धस्य इत्त्वविवक्षायाम् इ
त्यधिकृत्य उपमानाच्च समासान्तः उपमानवाची यो गन्धशब्दस्तदन्तात् समासात् इत्प्रत्ययो
भवति इकार इत्संज्ञकः अतिमिश्रणार्थः तथैव भसंज्ञायां यस्येति च इत्यकारलोपः ऊरुगन्धिः
इति स्थिते ऊरुगन्धिर्नाम कश्चित् तस्य ऊरुगन्धेरपत्यमिति विग्रहेण हितं समर्थानां प्रथ
माद्वा प्राग्दीव्यतो णः इत्यधिकृत्य तस्यापत्यं तस्येति षष्ठीसमर्थादपत्यमित्यस्मिन्नर्थे
यथाविहितं प्रत्ययो भवति गोत्रे णप्रत्ययः णकारः अचो ञ्णितीति वृद्ध्यर्थः इदितः

डो॰ ५७

इति तद्धितसंज्ञायां कृत्तद्धितसमासाश्चेत्य प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिक
योरिति सुपो लुक् तद्धितेष्वचामादेः ञ्णिति णिति च तद्धिते परेऽङ्गस्यादेरचो वृद्धिर्भवति
भसंज्ञायामङ्गस्य भस्य नस्तद्धिते टेर्लोपोऽकाठ इत्यधिकृत्य यस्येति च ॥ इवर्णावर्णयो
र्लोपो भवति ईकारे प्रत्यये भसंज्ञानिमित्ते च तद्धिते परतः इत्यकारस्य लोपः ऊ सुरगंध उ
ति स्थिते संयोगे गुरु इति गुरुसंज्ञायां अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे उत्तमश
ब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमाह उत्तमस्य समीपमुपोत्तमं गुरु उपोत्तमं ययोरणि
ञोरनार्षयोर्ऋषिवाचकयोर्गोत्रे विहितयोः ष्यङ् प्रत्ययो भवति षकारस्य प्रत्ययस्य प्रत्य
यस्यादिभूतस्य षकारस्येत्संज्ञा भवति षकारङकारयोर्लोपः प्रयोजनम् ष्यङः संप्रसार
णं पुत्रपत्योः वावलयोस्तत्पुरुषे इति विशेषणाय यस्येति चेत्यकारस्य लोपः यङश्चाप् यङ
न्ताच्चाप् प्रत्ययो भवति स्त्रियां पकारस्य लोपः एवं वत्स चकारश्चिन् इत्यतो टाताद्यः सवर्णे
दीर्घः कौसुरगंध्या इति स्थिते इत्याप्प्रवंत हात्स्वाद्यत्पत्तिः जायायाह वत्सूपनघः कौ
सुरगंध्या कौसुरगंध्ये कौसुरगंध्याः इत्यादि एवं वकारीषगंध्यादयः कर्ता अत्रा ईषोऽटीप
अकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप्प्रत्ययो भवति ङकारस्य लश
क्वतद्धिते इतीत्संज्ञा लोपः प्रयोजनं ङीति सामान्यग्रहणं पकारस्य हलन्त्यमितीत्संज्ञा

वै॰ पां॰ ५८

58

लोपः प्रयोजनं स्यातीति सामान्यग्रहणार्थः ङकारः पकारः अन्तसंज्ञो मा भूदित्यन्तरा
तार्थः इको यणचीति ऋकारस्य रेफः कर्त्री एवं हर्त्री स्रष्ट्री भवित्री वक्त्री दंतिनी हस्तिनी
दंडिनीत्यादि भवत् गोमत् कृतवत् पचत् महत् सरात् पाल्कार ऋकार तकारेत्यर्थो
प्रकारः स्वरार्थः ॥ उगितश्च ॥ उगिद्भ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप्प्रत्ययो भवति अनु
बंधलोपः प्रयोजनं पूर्ववत् भवती गोमती पटुमती कृतवती पचन्ती महती इत्यादिनः
ये ॥ वयसि प्रथमे ॥ कालकृता शरीरावस्था शैशवयौवनादिर्वयः अस्मिन् प्रथमे वयसि
यत्प्रातिपदिकं अत्या वर्तते तेनतो अकारान्तात् स्त्रियां ङीप्प्रत्ययो भवति अनुबंधलोपः प्र
योजनं पूर्ववत् यस्येति चेत्यकारलोपः कुमारी किशोरी तरुणी इत्यादि प्रथमे इति किं
स्थविरा वृद्धा अत इत्येव शिशुः ॥ कृदिकारादक्तिनः ङीष्वा कृतन्त इकारः कृदिकारः इ
दन्ताङ् भवति वक्तव्यमिति ङीप्रत्ययः यस्तु क्तिनः संबंधी इकारस्तदन्तान्न भवति ङ
कारषकारौ ङीप्मिति सामान्यग्रहणात् द्विवातार्थौ यस्येति चेत्यकारलोपः अंगुली अं
गुलिः अंजली अंजलिः आवली आवलिः पद्धती पद्धतिः धूली धूलिः रुची रुचिः इत्या
दि अक्तिन इति किं कृतिः प्रकृतिः मतिः स्वभिः वोतो गुणवचनात् अन्यतो ङीषिति
वर्तते गुणमुक्तवान् गुणवचनः गुणवचनात्प्रातिपदिकात् उकारान्तात् स्त्रियां ङीष्वा

ङी॰ ५८

त्ययोवाभवति अनुबंधलोपादि पूर्ववत् गुणाशेषः पटुः पट्वी मृदुः मृद्वी एघ :
एघ्वी गुरुः गुर्वी इत्यादि गुणवचनादिति किं आखुरियं जातेरस्त्रीविषयादयोपधा
त् जातिवाचियत्प्रातिपदिकं न च स्त्रियामेव नियतं स्त्रीविषयं यकारोपधं च तस्मा
त्स्त्रियां ङीष् प्रत्ययो भवति अनुबंधलोपादि पूर्ववत् हंसः उमान् हंसी स्त्रीप एवं कूर्मी
ऊहूरुरो ॥ सूकरी आर्यी ब्राह्मणी वृषली नदी भ्यामि जातेरिति किं मुण्डा अस्त्रीविष
यादिति किं मक्षिका अयोपधादिति किं क्षत्रिया ॥ शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवइ
त्येवमादित्य अयंतेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति शार्ङ्गरवी अनु
तेभ्यः विदस्यापत्यं स्त्री वैदी औरी गौतमी गालवी गोभिली इत्यादि प्रभृति तंत्रात्वाय
त्यं ... मत्यां कन्नो गालूव ... पनयः ॥ ऊङुतः ॥ मनुष्यजातिरिति वर्त्तते उकारान्तात्
प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ऊङ् प्रत्ययो भवति ङकारो नत्यातो इति वि
शेषणार्थः अनुबंधलोपादि पूर्ववत् अंतादिवच्चेत्येकादेशः सर्वं प्रत्ययवद्भवति परं
मत्यादिवद्भवती त्यादिवद्वा प्रातिपदिकसंज्ञायां स्याद्युत्पत्तिः ब्रह्मबन्धुः स्त्री स्वय
म्भू इत्येवमादयोः गंतव्याः ॥ ऊरूत्तरः ॥ एवं ऊत्यस्मात् प्रातिपदिकात् स्त्रियां
तिप्रत्ययो भवति तस्य तद्धितत्वात् प्रातिपदिकसंज्ञायां सत्यां स्याद्युत्पत्तिः करभोरूव

सा॰ पां॰ ५५

59

रूपनय॥ यवानिः यावतीः यवानय इत्यादिनलोपः प्रातिपदिकांतस्येति नलोपः
इतिसीप्रत्ययावनाताः ॥ यत्रार्थान्तरनिरपेक्षा शब्दस्य वृत्तिः सनवः प्रातिपदि
कार्थः अत्र ग्रहणं रूपलक्षणं अर्थवद्वत् प्रथमविभक्तिर्नाः परस्मैपते ॥ काश्चवि
भक्तयः स्वपलिनश्चतस्रः सप्तविभक्तयः सिऔजस इति प्रथमा अम्‌औशसिति
द्वितीया टाभ्यांभिसिति तृतीया ङेभ्यांभ्यसिति चतुर्थी ङसिभ्यांभ्यसिति पंचमी ङस
ओसामिति षष्ठी ङिओस्सुविति सप्तमी कस्मिन्नर्थे प्रथमा प्रातिपदिकार्थलिंगप
रिमाणमात्रे प्रथमा प्रातिपदिकार्थः सत्वालिंगंस्त्रीत्वमकारादिपरिमाणं प्रस्थादि
वचनमेकत्वद्वित्वबहुत्वानि प्रातिपदिकार्थमात्रे लिंगमात्रे परिमाणमात्रे वचनमा
त्रे प्रथमा विभक्तिर्भवति किंच प्रातिपदिकं अर्थवद्धातुरप्रत्ययः प्रातिपदिकं अ
भिधेयवचनोयं शब्दः अर्थवच्छब्दरूपं धातुप्रत्ययान्तं च वर्जयित्वा प्रातिपदिकसंज्ञो
भवति कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा भवन्ति अप्रत्ययइति एवं सूत्रे पर्युदासा
त्कृदंतस्य परात्स्य चानेन प्रातिपदिकसंज्ञा विधीयते अर्थवत्स्त्रग्रहणं नामसमास
ग्रहणं नियमार्थं तेन वाक्यस्यार्थवतः प्रातिपदिकसंज्ञा न भवति कस्यचिद्रूपत्वा
चकप्रातिपदिकमित्यर्थः तत्र प्रथमायत्र कश्चलोपः एवंवत्‌वृत्तामः वृत्तौ

ॐ ५५

धूतायेनतथासर्वतः सर्वतौसर्वताः कुंजरः कुंजरौकुंजराः अग्र्याः अग्र्यौअग्र्याः वधूः
वद्धौवद्धाः नौः नावौनावः देवविद् देवविदौदेवविदः दंतिनी दंतिन्यौदंतिन्यः १
अग्रज्ञः अग्रज्ञौअग्रज्ञाः एवंसर्वत्रयोज्यं संबोधनेच प्रथमेतिवर्त्तते आदिशुल्यकारणं संबो
धनं उद्दीपकं प्रातिपदिकार्थे प्रथमानप्राप्नोतिवचनमारभ्यतेते संबोधनेर्थे प्रथमा
विभक्तिर्भवति सामन्त्रितं संबोधनेया प्रथमाविहिता उक्तं तत्संज्ञं रूपसंज्ञं भवति हे दे
वदत्तपाहि हे यज्ञदत्तत्रवातिष्ठ अग्रेविस्तरमत्रमागाः हे तातउल्लवदेवेदग्धौध्या
मोः पाहिसंबोधहिवचने हंसौ समेषास्वनोस्वनोवरया जमातरोस्वेद मामाथाकहा
थ्याचको किलोगजोनरं जिह्नीघाषा पर्द्दीघांध्याचपाद पोबद्धवचने प्राघोप्रतिमा
समागच्छत हताम्यस्पर्द्धरथान तपस्विनः तमद्वच वीरुधः फलताधुना उक्तेवं
सर्वत्रयोज्यं कस्मिन्नर्थेद्वितीयाकर्मणिद्वितीयाअनभिहितइतिवर्त्ततेतिंकृतद्धित
समासैरनभिहितेअनुक्तेअनिर्दिष्टेकर्मणिकारकेद्वितीयाविभक्तिर्भवतिकिंकर्म
कर्तुरीप्सितंकर्मकर्तृक्रियया यदाप्तुमिष्टतमंतत्कारकंकर्मसंज्ञंभवति अन्नभुंक्ते
कटल्लोपलमन्यवहरतिवृक्षं छिन्नतिघटंकरोतिग्रामंगच्छति ॥ अकथितंच ॥१
अपादानादिभिविशेषकारकैर्यदकथितं तत्कारकंकर्मसंज्ञंभवतिदेवदत्तंभोजनं

ह्रे° पा° ६०

60

याचते यज्ञदत्तः मार्गं माणवकं पृच्छति अजां ग्रामं नयति कृष्णो देवदत्तेन सूर्यो चंद्र
मसौ पश्यति स्नानवको हंति नः पश्यति हंति नो गुह्यमानो पश्यति हृत्वा निरीक्षते का
कान्विधाति कसाः करोति वेपानधीते देवान्नमति गुरून्वा विस्पति प्रियान्प्रीणयति
इत्येवमादयो ज्ञेयाः उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि
दृश्यते उभयतो ग्रामं सर्वतो ग्रामं उपर्युपरि ग्रामं अधोधो ग्रामं दिग्देशवदलम अभितः
परितः समयानिकषाहाप्रतियोगेपि दृश्यते अभितो ग्रामं परितो ग्रामं समया ग्रामं नि
कषा ग्रामं हा देवदत्तं बुभुक्षितं न प्रतिभाति किंचिन्न अकथितं च कर्म बुद्धिया चिकीर्षित
मिभिलक्ष्यं चिन्त्रयोगेति मितं मन्दं वाविधान्त्रुविशासि गणेन च यत्संचनेतन्हा कीर्तितमा
चरितं कथितं ना अंतरान्तरेण युक्ते द्वितीया विधीयते अंतरान्तरेण शब्दौ निपातौ
इत्यनेन तद्योगे द्वितीया विभक्तिर्भवति षष्ठ्यपवादो योगः अंतरा शब्दो मध्यमार्थे
यत्र शानमाचष्टे अंतरेण शब्दस्तत्त्वविनार्थे अंतरा नदीं अंतरा त्वां मां च कमण्डलुः अं
तरेण पुरुषाकारं न किंचिल्लभ्यते अंतरेण देवदत्तं च विश्वामित्रः अंतरेण हरिं किं जीवि
तेन अंतरा चक्रं पुष्करमलः अंतरेण बलानि चरंति नश्च मंत्री अंतरेण वाजिनः केन यु
ज्यते इत्यादि सर्वं कालाध्वनोरत्यन्तसंयोगे कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्तिः

ॐ

६०

भवति अत्यन्तसंयोगे गम्यमाने क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबंधः अत्यन्त
संयोगे मासमधीते संवत्सरमधीते मासं कल्याणी मासं गुडधानाः अध्वनः खल्वपि क्रो
शमधीते क्रोशं कुटिला नदी योजनं पर्वतः अत्यन्तसंयोग इति किं मासस्य द्विरधीते क्रो
शस्यैकदेशे पर्वतः गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि गत्यर्थानां धा
तूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारके अध्ववर्जिते द्वितीयाचतुर्थ्यौ
भवतः ग्रामं गच्छति ग्रामाय गच्छति ग्रामं व्रजति ग्रामाय व्रजति गत्यर्थ इति किं
ओदनं पचति कर्मणीति किं अश्वेन व्रजति चेष्टायामिति किं मनसा पाटलिपुत्रं गच्छ
ति अनध्वनीति किं अध्वानं गच्छति अध्वशब्दस्य ग्रहणं पन्थानं गच्छति आस्थितप्रति
षेधश्चायं विज्ञेयः आस्थितः संप्राप्तः आक्रान्त उच्यते यत्र तूत्पथेन पन्थानं गच्छति त
त्र भवत्येवमेव च तत्र्थ्यौ पथे गच्छति द्वितीयाग्रहणं किं न चतुर्थ्येव विकल्प्येत अप
वादविषयेपि यथा स्यात् ग्रामं गन्ता ग्रामाय गन्ता कृद्योगलक्षणा षष्ठी न भवति कर्त्रे
येत् तृतीया कर्त्तृकर्मणोस्तृतीया कर्तरि करणे च कारके तृतीया विभक्तिर्भवति कः
कर्ता स्वातन्त्र्यकर्ता स्वतन्त्रः प्रधानः क्रियाप्रसिद्धौ यः स्यात् स्वातन्त्र्येण प्राधान्येन विवक्षि
तोऽयं तत्कारकं सर्वं भवति किं करणं साधकतमं करणं क्रियाप्रसिद्धौ यत्प्रकृष्टो

पकारकं विवक्षितं तत्साधकतमं करणसंज्ञं भवति तत्र तृतीया यथा हस्तिना हतः सिंहाः खं
डितः करणे यथा परशुना प्रहरति चक्षुषा पश्यति देवदत्तेन कृतं देवदत्तेन हतं देवदत्तेन गमनेन ग्रामं गम
हृष्टो हस्तिना पदेन चक्षुषा नेत्रेण सूत्रेण रामानुजचक्षुषा भक्षात् लोचनानां नेत्रसमनुजेनेनाः
नाया भ्यां पीडितेति निःस्वः शत्रुभ्यां यत्नेन मित्रः स नान्या बाधते काचिदृष्टिभ्यां मित्र
ते मनः यत्नैर्बाणैर्हताः के चिद्विद्वानेवेत्यग्नेः पक्षाभिमिः हूयमानो मायया नाभिर्हतिवाः
नरान् इत्यादि तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानं प्रकृत्यादिरूपः प्रकृत्या दर्श
नीयः गार्ग्योऽस्मि गोत्रेण समानधान्यतिविषमेण धावतीत्यादि यथा चोक्तं प्रकृत्या च
पत्नेवि प्रयोगो वेणा वेश पवदनयुक्ते अप्रधाने तृतीया विभक्तिर्भवति सह देवदत्तेन य
ज्ञदत्त आगतः पुत्रेण सहागतः पिता पुत्रेण सह स्थूलः पितुरत्र क्रियाभिसंबंधः प्रा
धान्येन पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यं सहार्थेन योगविधानात्तृतीया योगे
पि भवति विनापि सहार्थेन भवति वृद्धो यूनेति निपातनात् सुतेन पितास्थितः साकं
सुतेनाभ्यां जगतं महत्त्वं सार्धं कान्ताभ्यां नयने वहीर्घोऽस्मि शिष्य स्वरं ते बलकाश्च सावं मध्य
नन्दनेन वयो मरालिः सार्धं जनेन वनवासा जानकि स्थितवाहित्यादि एष्वेना गविक्रा
रः ॥ ग्रंग शब्दो त्रेगमन उदाय शास्त्रे येव तते नेयेनेति वनवयवाद्धेनत्वे नतिति च्येत्यपेना

गणविकृतेनांगिनो विकारो लक्ष्यते ततोऽत्र तृतीया विभक्तिर्भवति अक्ष्णा काणः पादेन
खंजः पाणिना कुणिः अवयवधर्मेण समुदायोऽत्र लक्ष्यते अंगविकार इति किं अक्षिका
णमस्य पश्य इत्थंभूतलक्षणे कंचित्प्रकारं प्राप्तः इत्थंभूतः तस्य लक्षणमित्थंभूतलक्ष
णं तत्र तृतीया विभक्तिर्भवति श्वेतातपत्रेण राजानमद्राक्षीत् छात्रेणोपाध्यायं स्मरं
मकरध्वजेन शंखचक्राभ्यां शार्ङ्गिणं नेत्रैः पिनाकिनमित्यादि ॥ हेतौ ॥ तृतीयेति
वर्त्तते फलसाधनयोग्यः पदार्थो हेतुरित्युच्यते इहापि तस्मात्तृतीया विभक्तिर्भवति
धनेन कुलं श्रुतेन सेवते शास्त्रीभ्यां हन्यते हलाभिर्ज्यते कृतादि इत्यादि सर्वं कार्ये च
तुर्थी सम्प्रदाने चतुर्थी सम्प्रदाने कारके चतुर्थी विभक्तिर्भवति किं सम्प्रदानं कर्मणा
यमभिप्रैति स सम्प्रदानं कर्मणा करणभूतेन यमर्थमभिप्रैति कर्त्ता तत्कारकं सम्प्र
दानं तत्र चतुर्थी वेदविदे गां ददाति महद्रूपं नरेन्द्रे देहि नेत्रा यभोजनं देहि पापरूपाय ज
लं देहि मातापितृभ्यां काशिवस्त्रं ददाति कपिभ्यां पितरं ददाति श्रुगेभ्यस्ताय वितरति
केशोत्वस्मै लक्षीरं इत्यादि ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ क्रोधः अमर्ष
अपकारः द्रोहः अक्षमा ईर्ष्या गुणेषु दोषाविष्करणमसूया क्रोधाद्यर्थानां धातू
नां प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानसंज्ञं भवति देवदत्ताय क्रुध्यति मित्राय द्रु

ह्राति ग्रार्थयोर्द्वेषेति वा पचायाः सूयते इत्यादि तादर्थ्ये चतुर्थी वक्तव्या हृत्वार्थं जलमा
नय हृत्वार्थमित्यर्थः हिरण्याय कुण्डलायेदं चकारेण कल्पितं यज्ञपशुरानीतः यानायावि
श्वकर्मणे संयमाय श्रान्तः पवनेन धर्माय संयमे धर्ममोक्षाय मे धावो धनं दानाय उक्ताय ते
त्यातेरताप्यमाने चतुर्थी वक्तव्या वाताय कपिला विद्युत् नपाय चलो हिनो ॥ हितयो
गे चतुर्थी वक्तव्या परोगिणो हितं ग्रामयिने हितं क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।
क्रियायाः अर्थः क्रियार्थः स उपपदं यस्य सोऽयं क्रियार्थोपपदः तस्मात् लोकक्रियायाः क्रि
यार्थायामित्येष विषयो लक्ष्यते क्रियार्थोपपदस्य स्थानिनः अप्रयुज्यमानस्य धातोः क
र्मणि कारके चतुर्थी भवति द्वितीयापवादे योगः एधेभ्यो व्रजति एधानाहर्तुं कल्पाभ्याह
र्तुं व्रजतीत्यर्थः क्रियार्थोपपदस्येति किं प्रविशत पिण्डीं प्रविश पिण्डीम् भक्षितव्य म
यानेन तु क्रियार्थोपपदः कर्मणीति किम् एधेभ्यो व्रजति शकटेन स्थानिन इति किं एध
धानाहर्तुं व्रजति तुमर्थाच्च भाववचनात् ॥ तुमुनास्मर्थः तुमर्थः तुमर्थं भाववच
नप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी भवति पाकाय व्रजति त्यागाय व्रजति संपत्तये व्र
जति तुमर्थादिति किं पाकः त्यागः भाववचनादिति किम् कारको व्रजति नमः स्वस्ति
स्वाहा स्वधालंवषड्योगाच्च ॥ एतैर्योगे चतुर्थी भवति नमः सर्वतः नमः शंकराय नमो

रायणाभ्यां नमो मातापितृभ्यां नमो गुरुभ्यः नमश्चाचार्येभ्यः स्वस्ति प्रजाभ्यः स्वाहा इ
ताग्नानाय स्वधा पितृभ्यः अलं मल्लो मल्लाय अलमिति पर्याप्त्यर्थस्य ग्रहणं तेन प्रभु
र्मल्लो मल्लाय समर्थः सामर्थ्यस्मारमेघाय वषतिन्द्रायेत्यादि सर्वत्र ॥ कस्मिन्नर्थे पंच
मी अपादाने पंचमी अपादाने कारके पंचमी विभक्तिर्भवति किमपादानं ध्रुवमपाये
अपादानम् अपायो पगमः अपगमसापेक्षत्वेन विषयभूतं यद्ध्रुवमवधिभूतं तद्विवक्षितं
तत्कारकमपादानसंज्ञं भवति तत्र पंचमी अश्वादवतरति हस्तिनोऽवतीर्णः वृक्षात्प
र्णं पतति ग्रामादागच्छति धावतोऽश्वात्पतति प्रासादादवतरिष्यति हस्तात्स्खलति संसार
न्मुक्तः स्यान्नाभ्या पयः स्रवति स्त्रीतो व्यपैति उरुभ्यामागत्य स्थितः प्रासादादवतरि
ष्यति हस्ताश्चात्पतते संसारान्मुक्तेन नाभ्या पयः स्रवति स्त्रीभ्यो व्यपैति उष्णेभ्यो गच्छा
याति पर्वतेभ्यः स्रवंति इत्यादि ॥ भीत्रार्थानां भयहेतुः बिभीत्यर्थानां त्रायत्यर्थानां तथा
तेनाप्रयोगे भयस्य हेतुर्यत्तत्कारकमपादानसंज्ञं भवति व्याघ्राद्बिभेति मातापितृ
भ्यां त्रस्यति पापेभ्यः त्रस्यति चौराद् उद्विजते चौरात्त्रायते देवदत्तं यज्ञदत्तः पापात्त्रायते
भगवान् जायते जगत् व्याधिभ्यः परिरक्षति शत्रुभ्यः खेभ्यः पाति गोपालः सर्पेभ्यो गाः
पालयति इत्यादि ॥ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ पंचमी

वृं
पां
६३
63

निवर्त्तते ॥ अन्यग्रामात् इत्यत्र कृते दिक्शब्दे अन्तरपदं ग्रामग्रामे इत्यनेनैवं चेत्पंच
मीभवति अन्येत्यर्थग्रहणं तेन पर्यायप्रयोगेपि भवति अन्यो ग्रामाद्विहारः अत्रान्या
द्ध्यजने अन्यो देवदत्ताद्यज्ञदत्ताभिन्नो विष्णुमित्राद्देवमित्रः अर्थान्तरं देवदत्तात् विल
क्षणो देवदत्तात् आरात्सहहनाति कथं वर्तते ग्रामात् आराद्वनम् वनाद्ग्रामात्तृतीय
तर इति निर्दिश्यमानस्य प्रयोगे पदार्थः उच्यते इतरो देवदत्तात् यज्ञदत्तः स्वामिन इतरो
भवकः ऋते इत्यर्थवर्जने धर्मं वर्तते ऋते धनान्न सम्वृद्धिः दिक्शब्दे पूर्वो ग्रामात् उत्त
रो नगरात् दक्षिणो ग्रामात् पर्वतः ननाद्उत्तरान्नदीत्यादि ॥ दिक्शब्देनात्र शब्दग्रहणं देशा
कालवृत्तिनापि योगे यथा स्यात् इत्यत्र आदि दिग्वृत्तिनैव स्यात् पूर्वो ग्रामात् पर्वत शब्द
ग्रहणाद्दृष्टान्ते दिशि दृष्टः शब्दः इत्यर्थो लभ्यते तेन यद्यपि सम्प्रति दिक्शब्दो देशका
ले वा वर्तते सोपि दिशि दृष्ट इति तद्योगेपि पंचमी भवति तत्र देशवृत्तिना योगे पूर्वो
ग्रामाद्देशः कालवृत्तिनापि योगे पूर्वो ग्रीष्माद्वसन्तः अञ्चूत्तरपदे प्राग्ग्रामान्नदी
ग्रामादर्वाग्दृष्टो देवः आरग्रामात् प्रत्यग्ग्रामात् आच्चू दक्षिणा ग्रामात् इत उत्तरान्नगरात्
आहि दक्षिणाहि वसति चण्डालाः इति इत रवचनयोरपि योज्यं पृथग्विनानाभिस्तृ
तीयान्यतरस्यां पंचमी ग्रहणमिहानुवर्तते पृथग्विना नाना इत्येतैर्योगे तृतीया विभ

डो
६३

त्तिर्भवत्यन्यतरस्यां पंचमे च पृथग्देवदत्तेन पृथग्देवदत्तात् नानादेवदत्तेन नाना
देवदत्तात् पृथग्विनानानाभिरिति योगविभागो द्वितीयार्थः विनावातं विनावर्षं वि
द्युत्प्रपतनं विना विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ ॥ विनावातं विनापि
त्तमवलंपता तां विना विना वेद्यकृतं दोषं केनेमौ पातितौ तान नो ॥ करणे च स्तोका
ल्पकृच्छ्रकतिपयस्यासत्ववचनस्य स्तोकाल्प कृच्छ्र कतिपय इत्येतेभ्यो सत्वव
चनेभ्यः करणे कारके तृतीया विभक्तिर्भवति अन्यतरस्यां पंचम्यत्र पक्षे विधीयते तृ
तीयातु करणे ऽसत्ववचनग्रहणं धर्ममात्रं करणतया विवक्षितेन द्रव्यं ऽसत्स्तोका
दीनामसत्ववचनतां स्तोकान्मुक्तः स्तोकेन मुक्तः अल्पान्मुक्तः अल्पेन मुक्तः कृ
च्छ्रान्मुक्तः कृच्छ्रेण मुक्तः कतिपयान्मुक्तः कतिपयेन मुक्तः असत्ववचनस्येति
किं स्तोकेन विषेण हतः अल्पेन मधुना मत्तः करणे इति किं क्रियाविशेषणे क
र्मणि मा भूत् स्तोकं चलति ॥ विभाषा गुणे ऽस्त्रियां ॥ पंचमीति वर्तते हेताविति
वर्तते गुणो हेतौ च स्त्रीलिंगे विभाषा पंचमी भवति तृतीया च जाड्येनाबद्धः जाड्या
द्बद्धः गर्वेण विक्ति गर्वाद्विक्ति अस्त्रियाः शृद्धः हृतवात्वेनत्वारि सर्वम् दूरांति
कार्थैः शब्दैर्योगे षष्ठ्यन्यतरस्यां ॥ पंचम्यनुवर्तते दूरांतिकार्थैः शब्दैर्योगे षष्ठी वि

वृ॰ पा॰ ६४

64

भक्तिर्भवत्यन्यतरस्यां दूरं ग्रामात् दूरं ग्रामस्य ॥ विप्रकृष्टं ग्रामात् विप्रकृष्टं ग्रामस्य
अंतिकं ग्रामात् अंतिकं ग्रामस्य अभ्याशं ग्रामात् अभ्याशं ग्रामस्य ॥ दूरांतिकार्थेतः
शब्देभ्यो द्वितीया विभक्तिर्भवति पंचमी च तृतीयासप्तम्यावपि दृश्यते ---- दूरं ग्रा
मस्य दूरेण ग्रामस्य अंतिकं ग्रामस्य अंतिकेन ग्रामस्य अंतिकाद्ग्रामस्य अंतिके ग्राम
स्य तद्वद्दूरांतिकार्थेभ्यश्चतस्रो विभक्तयो भवंति द्वितीया तृतीया सप्तमी पंचमी च
कस्मिन्नर्थे षष्ठी शेषे ॥ षष्ठी शेषे ॥ कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्व
स्वामिसंबंधादिः शेषः तत्र षष्ठी भवति राज्ञोऽमात्यः पशोः पादः पितुः पुत्रः पूर्वंतः व
नेमेवकस्यावृन्दः मनुजस्य तेरसमर्थस्य रागिमः प्रलालस्य भस्म ॥ स्वहृत्तेः संगतिः
प्रीत्यै विद्वषां मेरणाय च मित्रियो रमृतं वाक्यं पुत्रयोः स्वपितृतः ॥ एतानां महा
तिभांति महतां वाग्मिनामपि च वृत्तानां च फलं भाति पुष्पाणां गंधएव च ॥ प्रियाणां
मधुरं वाक्यं कवीनां रसवत्त्वचः गुरूणां वचनं पथ्यं कातृणां पुत्र मेवचः ॥ अन्यादि
तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्योपमाशब्दौ वर्जयित्वा शेषविषये वि
धानात् यथा कृष्णेऽषष्ठ्येव भवति चंद्रेण तुल्यं शुभ्रं चंद्रस्य तुल्यं शुभ्रं कमलेन सममेव
दं वक्त्रस्य सदृशः सौम्यो सदृशः शशिना राजा राज्ञो भास्वात्प्रभावतः ॥ नेत्राभ्यामस्य

जो॰ ६४

नेतत्स्ये इत्यलघोऽस्मृते नगैः समनागैश्चानगैश्चाणो समानगाः इत्यादिस्तवैघोऽजंध्य
धीगर्थदयेशां कर्मणि ॥ शेषइत्यनुवर्त्तते अधीगर्थाः स्मरणार्थाः दयतिर्दानगतिरक्षणा
षुईश ऐश्वर्ये एषां कर्मणि शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति मातुरध्येति मातुः स्म
रति सर्पिषो दयते सर्पिष ईष्टे कर्मणीति किम् मातृगुणैः स्मरति शेषइत्येव मात
रं स्मरति ॥ कृञः प्रतियत्ने ॥ सतो गुणान्तराधानं प्रतियत्नः करोतेः कर्मणि कार
के शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी भवति एधोदकस्योपस्कुरुते काण्डगुण
स्योपस्कुरुते प्रतियत्न इति किं कटं करोति कर्मणीति किं एधोदकस्योपस्कुरुते प
नेधा शेषइत्येव एधोदकमुपस्कुरुते ॥ आशिषि नाथः नाथृ याचोपतापैश्वर्याशीःषु
पठ्यते तस्याशीः क्रियस्य कर्मणि कारके षष्ठी भवति सर्पिषो नाथते मधुनो नाथ
ते आशिषीति किं माणवकमुपनाथति ॥ रुजार्थानां भाववचनानामज्वरेः ॥ रु
जार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके ष
ष्ठी भवति चौरस्य रुजति रोगः चौरस्यामयत्यामयः रुजार्थानामिति किम् एति जीव
न्तमानन्दः भाववचनानामिति किं नदी कूलानि रुजति अज्वरेरिति किम् चौरं
ज्वरयति ज्वरः शेषइत्येव चौरं रुजति जासिनिप्रहणनाटक्राथपिषां हिंसायां जा

हे॰ पा॰ ६५

65

जासिनिप्रहणनाटक्राथपिषां इत्येतेषां हिंसाक्रियाणां कर्मणि कारके षष्ठी भवति ज
ल्पिसयोजासतताडने इति वा स्वरादौ पठ्यते चौरस्योज्जासयति चौरस्य निप्रहंति चौ
रस्य प्रणिहंति चौरस्य निहंति चौरस्य प्रहंति चौरस्य प्रहंति चौरस्योन्नाटयति चौरस्य
क्राथयति चौरस्य पिनष्टि हिंसायामिति किं धानाः पिनष्टीत्यादि व्यवहृपणोः स
मर्थयोः ॥ व्यवहृपण इत्येतयोः समानार्थयोः कर्मणि कारके षष्ठी भवति द्यूत
र्थयविक्रय व्यवहारे च समानत्वमेतयोः शतस्य व्यवहरते शतस्य पणते क्रायप्रत्य
यकस्मान्न भवति स्तुत्यर्थस्य पणेरायप्रत्ययो भवति न व्यवहारार्थस्य समर्थस्य व्यवहा
रे तेनात्र स्वं पणते समर्थयोरिति किम् शलाकां व्यवहरति विक्षिपतीत्यर्थः ब्राह्मणा
न्पणायते स्तौतीत्यर्थः ॥ कस्मिन्नर्थे सप्तमी ॥ सप्तम्यधिकरणे च अधिकरणे
कारके सप्तमी सप्तमी विभक्तिर्भवति चकाराद्दूरांतिकार्थेभ्यश्च किमधिकरणं क
र्तृकर्मणोः क्रियाश्रयभूतयोर्धारणात्क्रियाप्रत्ययः आधारस्तत्कारकमधिकरणसं
ज्ञं भवति तत्र सप्तमी कटे आस्ते शकटे आस्ते पुष्पेषु गंधः समीपे च वृद्धौ गावश्च शेरते स्त
नयोः पतितं नेत्रे नेत्रयोः पतितं मनः ॥ दूरात्पारपाः संति गंगायां सुबालुकाः वातो
स्ववर्तते बुद्धिः प्रायो धर्मे कथायां च ॥ वृक्षेषु संति पुष्पाणि पुष्पेषु भ्रमराः शाला॰

हे॰ ६५

चलावनेषु मातंगाश्चरमाणि ---- मानुषु ॥ इत्यादि ॥ सप्तमीविधाने कर्मो
द्विषयस्य कर्मणोपसंख्यानं अधीती व्याकरणे परिगणिती ॥ याज्ञिक ॥ साध्वसा
धुप्रयोगाः सप्तमीवक्तव्या साधुर्देवदत्तो मातरि असाधुर्देवदत्तःपितरि कारकार्ह
णांचकारकत्वे सप्तमीवक्तव्या दरिद्रेष्वासीनेषु ऋद्धाभुंजते ऋद्धेषुभुंजनेषु दरि
द्राआसते ॥ आकारकार्हाणामपि कारकत्वे सप्तमीवक्तव्या ऋद्धेष्वासीनेषु
दरिद्राभुंजाते इत्यादि इन्द्रांतिकार्यंतत्वाश्च ॥ रुदेर्देवदत्तःसमीपं आसत तत्त्वा आ
सत्ते आसते इत्यादि ॥ निमित्तात्कर्मसंयोगे वाच्यं प्रति सप्तमी चर्मणि द्वीपि
नं हंति दंतयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि ॥ पुष्कलको हतः इत्या
दिकर्मसंयोगा इति किं वेतनेन धान्यं लुनाति यस्य च भावेन भावलक्षणम् सप्त
मी वर्त्तते भावः क्रिया यस्य भावेन यस्य क्रियया क्रियांतरं लक्ष्यते ततो भाववतः स
प्तमी भवति क्रियया क्रियांतरं लक्ष्यते ततो भाववतः सप्तमी भवति क्रियया क्रियांतरं
लक्ष्यते ॥ रुदति भाववति जातो राज्ञः पुत्रो जातो राज्ञः पुत्रो व्यपेत तपङ्कः पुत्र
त्वरसालिनिपतिता गतिः इहयति चंद्रमसि विकसत्युत्पलं मेघे वर्षति देवे वा
रघ्राया तिवाती वाति भञ्जो हतते जाते नराजनि प्रविष्टो मा भूः राजनि आगच्छति

व्रुं प्रा ६६

66

गतोमात्यः मातोः पित्रोश्च स्वर्गं गतः गोषु दुह्यमानासु गतः दुग्धास्वागतः संपन्नेष्वा
गतः अग्निष्वहूयमानेषु गतः हीनेषु पतेषु सर्वेषु जनानुगतः उत्पादिभावेनेति किं यः
राजाभिः साधुर्नाभावलक्षणमिति किं यो भुङ्क्ते स एव व्रजति षष्ठी चानादरे ॥ पूर्वेण ॥
सप्तम्या प्राप्तायां षष्ठी विधीयते चकारात्सापि भवति अनादरेऽधिके भावलक्षणभाव
वतः षष्ठी सप्तम्यौ भवतः हिषतः पश्यतः स्वं गच्छ हि वदति पश्यति त्वं गच्छ आगच्छः प
बलस्य स्वयं क्रीडति राजा आगच्छति परबले स्वयं क्रीडति राजा मातापित्रोः रुदतोः प्र
व्रजति विक्रयतां जनानां गतः स चौरः विक्रोशत्सु जनेषु गतः स चौरः किमपि व
दन्ति वदत्सु स्वयमधीयाति साधुमार्गेणान्यास्थितत्वात् निर्धारणे षष्ठी सप्तम्यौ वर्त
ते जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं ततः षष्ठी सप्त
म्यौ भवतः मनुष्याणां क्षत्रियः शूरतमः मनुष्येषु वा गवां कृष्णा संपन्नक्षीरा गो
षु वा अध्वगानां धावन्तः शीघ्रगः अध्वगेषु वा एवमितरवचनयोरपि अन्यत्वेन क्वापि वि
शेषा विभक्तीनामर्थविभागः इति ॥ इति विभक्तिवृत्ताः समाप्ताः ॥ अथ समवृत्ताना
मैकपद्यं नानापदस्य संवृत्तिर्नाम समास उच्यते सोपि स्वबंतहान्तस्वबंताश्रितहास्वस्वव(?)
तानं तत्र संक्षेपेणोपदिश्यते स च द्वेधा पदार्थप्रधानो अव्ययीभावः उत्तरपदार्थप्रधान

श्री ६६

न्यपुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वन्द्वः इति चतुर्विधः त
त्र प्रथमम् अव्ययीभाव उच्यते उपकुम्भम् इति स्थिते उपशब्दस्य समीपवाचिनः प्रथमैक
वचनम् कुम्भशब्दात् षष्ठ्येकवचनम् ङस् अविग्रहो नित्यसमासः अस्वपदविग्रहः इति
वा कुम्भस्य समीपम् इत्यन्यपदेन विग्रहे सुबामन्त्रिते पराङ्गवत्स्वरे ॥ प्राक्कडारात्स
मासः सह सुपा अव्ययीभाव इत्यधिकृत्य अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावा
त्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथा --- नुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्या
न्तवचनेषु ॥ विभक्त्यादिष्वर्थेषु ---- यदव्ययं वर्तते तत् उत्तरपदेन सुबन्तेन सह स
मस्यते अव्ययीभावसंज्ञकश्च समासो भवति स च समर्थः पदविधिरिति समर्थानामे
व भवति इति वक्तव्यं समासश्चात् कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां सुपो
धातुप्रातिपदिकयोरिति सुपो लुक् प्रथमानिर्दिष्टं समास उपसर्जनमिति उपश
ब्दस्योपसर्जनसंज्ञा उपसर्जनं पूर्वमिति उपशब्दस्य पूर्वनिपातः ऐकपद्यमेकस्व
र्यमेकविभक्तित्वं समासस्य प्रयोजनं उपकुम्भ इति स्थिते तत्र स्वाद्युत्पत्तिः प्रथमैक
वचनं सु अव्ययीभावश्च अव्ययीभावः समासः अव्ययसंज्ञो भवति इत्यव्ययसंज्ञाया
अव्ययादाप्सुपः इति सुपो लुकि प्राप्ते ॥ नाव्ययीभावादतोऽम्त्वपञ्चम्याः अकारान्तादव्य

यीभावाऽन्तरस्य तृपोऽल्लुगभवति तस्य तत्रतत्रस्यस्यं भवति पंचम्याः अमिपूर्वे
त्वं उपकुंभं तिष्ठति कुंभंस्यसमीपं तिष्ठतीत्यर्थः तथैवद्वितीयामव्ययीभावः उपकुंभं
पश्येत्यादि तृतीयासप्तम्योर्बहुलम् अकारान्तादव्ययीभावादन्तरयोस्तृतीयास
प्तम्योः बहुलमभावो भवति ॥ उपकुंभं कृतं उपकुंभेन कृतम् वचनभ्यामम्भा
वः उपकुंभं देहि उपकुंभादागतः उपकुंभं उपकुंभान्निधेहि उपकुंभे निधेहि ॥ निं
मक्षिकाऽ इति स्थिते निःशब्दार्थाभाववाचिनः प्रथमैकवचनमक्षिकाशब्दात्ष
ष्ठीबहुवचनं भवति आम् मक्षिकाणामभाव इति विग्रहे हन्तेष्वपि कारे अव्य
यं विभक्तीत्यादिना समासः सत्वं कनिशब्दस्य पूर्वनिपातः अव्ययीभावश्च अव्य
यीभावश्चाः समासान्तनपुंसकलिंगं भवति इति नपुंसकलिंगत्वं ह्रस्वान्नपुंसके
प्रातिपदिकस्येति ह्रस्वत्वे तथैव स्याद्युत्पत्तिः एवं परभावादि निर्मक्षिकं व
नेमक्षिकानामभावो वर्त्ततेऽत्यर्थः शेषं उपकुंभवत् नेयं नयथाशक्तिः इति स्थिते
यथाशब्दात् स्याद्यन्त अतिवृत्तिवाचिनः प्रथमैकवचनं शक्तिशब्दाद्वितीयैकवचन
शक्तिमनतिक्रम्येति तथैवान्यपदेन विग्रहेन तेष्वपि कारे यथापदस्य पायोगः तां
वीप्सापदार्थानतिवृत्तिः सादृश्ये च यथार्थोः तत्र यथेति एवं णत्वमिति द्वनवदनसादृ

थप्रतिषेधार्थे तत्रासादृश्येच वर्तमाने यथाशब्द उत्तरपदेन सह समस्यते अव्ययी-
भावसंज्ञकश्च समासो भवति तत्र एवं वत्समासत्वं सुपोल्लुकं तथैव यथाशब्दस्य
एवं निपातस्याद्युत्पत्तिः ॥ एवंवदव्ययसंज्ञायामव्ययादाप्सुप इति सुमोल्लुकं अभा-
वः स्वनपुंसकत्वान्न भवति यथाशक्ति करोति शक्तिमनतिक्रम्येत्यर्थः यथावृद्धिं त्व
ब्राह्मणानामामंत्रयस्व यथासादृश्ये इति किं यथा देवदत्तस्तथा यज्ञदत्तः यावदमा-
त्रे इति स्थितेऽमत्रापि जस्यावति अमत्राणि संभवंतीति विग्रहे तेष्वपि कारे अव-
धारणे यावत् शब्दो धारणे वर्तमाने उत्तरपदेन सह समस्यते अव्ययीभावसंज्ञ-
कश्च समासो भवति शेषं पूर्ववत् यावदमत्रं ब्राह्मणानामंत्रयस्व ॥ **अथ तत्पुरुष-
समासः** ॥ कष्टं श्रितः इति स्थिते कष्टशब्दात् द्वितीयैकवचनं श्रितशब्दात् कष्टं
श्रित इति विग्रहे समर्थः पदविधिः स्वरामंत्रितोपरा ‥ प्राक्कडार ‥ तत्समासः स-
ह सुपा विभाषः तत्पुरुष इति प्रवर्तते ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्ता-
पन्नैः ॥ द्वितीयांतं सुबंतं समर्थं श्रितादिभिरुत्तरपदैः सह विभाषा समस्यते तत्पु-
रुषसंज्ञकश्च समासो भवति एवं वत्सुपोल्लुक एवं वत्वाद्यशब्दस्य एवं निपातः त-
तः स्वाद्युत्पत्तिः कष्टश्रितः श्रितशब्दस्य क्रियावाचित्वात् त्रिलिंगता कष्टश्रिते

रू॰
पं॰
६८

68

यैरन्नः। कष्टश्रिता ब्राह्मणी कष्टश्रितं ब्राह्मणकुलं एवमनीनादिभिः समासः। शं
कुलाखंड इति स्थिते शंकुलाशब्दात् टा खंडशब्दात् सि शंकुलया खंड इति विग्रह विग्र-
हे एवं स्मिन्नेवाधिकारे तृतीयान्तं तत्कृतार्थेन गुणवचनेन ॥ तृतीयान्तं तत्कृतं समर्थं
गुणवचनेन तत्कृतेन तृतीयाकृतेनार्थशब्देन चोत्तरपदेन सह विभाषा समस्यते
तत्पुरुषश्च समासो भवति शेषं पूर्ववत् स्याद्यन्तत्वात् विः शंकुलया खंडः शंकुलाखंडः
खंडशब्देन गुणवचनत्वात् त्रिलिंगत्वात् धान्येनार्थ इति विग्रहे तेनैव सूत्रेण धान्यश
ब्दस्यार्थशब्देन समासः शेषं पूर्ववत् धान्यार्थः तृतीयशब्दवद्रूपाणि कुंडलहिर
ण्य इति स्थिते कुंडलशब्दात् तादर्थ्ये चतुर्थ्येकवचनं ङे हिरण्यशब्दात् सि कुंडलाय
हिरण्यमिति विग्रहे चतुर्थी ॥ तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यन्तं तत्
समर्थं तदर्थवाचिना उत्तरपदेनार्थबलिहितसुखरक्षितैः सह विभाषा स
मस्यते तत्पुरुषश्च समासो भवति शेषं समानं स्याद्यन्तत्वात् विः नपुंसकत्वात् अमो भा
वः कुंडलहिरण्यं कुंडशब्दवद्रूपनयः एवं यूपाय दार्वित्यादि ॥ चौरभय इति स्थि
ते चौरशब्दात् पंचमी भयशब्दात् सि चौरेभ्यो भयमिति विग्रहे पंचमी भयेन पंचम्यन्तं भ
वतं समर्थं भयशब्देनोत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च समासो भवति

ऊं॰
६८

शेषं पूर्ववत् चौरभयं कं ङ शब्दात् वहुपतयः एवं वृकभयमिति राजन्पुरुष इति स्थि-
ते राजन्शब्दात् षष्ठ्येकवचनं ङस् उ पुरुषशब्दात् स्यादितः पुरुष इति विग्रहे ॥ ष-
ष्ठी ॥ षष्ठ्यन्तं पूर्ववत्तच्च समर्थमुत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च स-
मासो भवति सुपो लुक् क्रियते अन्तर्वर्तिनीं विभक्तिं समीक्ष्य पदसंज्ञायां नलोपो न-
लोपः प्रातिपदिकान्तस्येति नलोपः शेषं पूर्ववत् राजपुरुषः देवदत्तस्याव(?) अक्ष-
शौण्ड इति स्थिते अक्षशब्दात् शौण्डशब्दात् सप्तम्येकवचनं शौण्डशब्दात् अक्षेषु शौण्ड इति
विग्रहे सप्तमी शौण्डैः सप्तम्यन्तं पूर्ववत् शौण्डादिभिरुत्तरपदैः सह विभाषा समस्य-
ते तत्पुरुषश्च समासो भवति शेषं पूर्ववत् स्याद्युत्पत्तौ अक्षशौण्डः एवमन्तेक(?)
भावाद्यपचन्त(?) पञ्चमूल इति स्थिते उभयत्रापि प्रथमा बहुवचनं जस् पञ्च मूलानि समा-
हृतानीति विग्रहे एवमस्मिन्नेवकाधिकारे दिक्संख्ये संज्ञायामिति वर्तमाने तद्धितार्थो-
त्तरपदसमाहारे च तद्धितार्थे विषयभूते उत्तरपदे परतः समाहारे चाभिधेये दि-
क्संख्ये समासाधिकारो नोत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च समासो
भवति संख्यापूर्वो द्विगुः ॥ संख्यापूर्वस्तत्पुरुषः समासो द्विगुसंज्ञो भवति द्विगु-
रेकवचनं द्विगुः समासोऽप्येकवचनान्तो भवति हलन्तं एकं यस्मादयमेकवद्भावः ।

टं॰ पा॰ ६६

69

सनपुंसकलिंगो भवतीति नपुंसकलिंगे प्राप्ते अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्य
ते इति स्त्रीलिंगतायामित्यपि ह्रस्व ॥ द्विगोः ॥ द्विगोः समासात् ङीप् प्रत्ययो भ
वति ङकारपकारयोर्लोपः प्रयोजनम् एवं वत्त एवं स्य भसंज्ञायां यस्येति त्यकार
लोपः स्यादित्वात्स्वाद्युत्पत्तिः पंचमूली कत्रीशाहूवरूपनयः एकवद्भावात्सर्व
त्रैकवचनमेव पंचकपाली दशकपाली प्रत्ययः नीलउत्पल उत्पल इति स्थिते उभ
यत्रापि प्रथमैकवचनं तु विशेषणविशेष्यभावप्रसिद्ध्यर्थं उभयत्रापि च शास्त्रप्रयो
गः नीलं च तदुत्पलं चेति विग्रहे एवं स्मिन्नेवाधिकारे एवं काले सर्वं जगत्तु गण
न वकेवला समानाधिकरणेनेति वर्तमाने विशेषणं विशेष्येण बहुलं ॥ एका
र्थं समानाधिकरणं भेदकं विशेषणं भेद्यं विशेष्यं विशेषणवाच्यं सुबन्तं सम
र्थं विशेष्यवाचिना समानाधिकरणेन सह बहुलं समस्यते तत्पुरुषश्च समासो भ
वति ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः समानाधिकरणस्तत्पुरुषः कर्म
धारयसंज्ञो भवति इत्याद्यानाम् प्रयोग इति यथाशास्त्रं निवृत्तिः स्वाद्युत्पत्तिः नपुंसक
त्वात्स्वरभावः नीलोत्पलं एवं रक्तोत्पलादयः ॥ तथा कृष्णा चासौ सारीति वि
ग्रहसमासे कृते एवं वत्त कर्मधारयसंज्ञायां पुंवत्कर्मधारयजातीयदेशीयेषु

डो॰ ६६

उत्तरपदे इति वर्त्तते कर्मधारये समासे जातीयदेशीययोश्च प्रत्यययोः परतः पूर्वप-
दस्य पुंवद्भावो भवति पुंवद्भावात् टापो निवृत्तिः स्याद्युत्पत्तिः कृष्णसार्ङ्गीपूर्वेत्र कापटी
टयः नानञ् अश्व इति स्थिते नकारलोपः अयोजनं नलोपो नञ इति विशेषणं उभयत्रा-
पि च अश्वादति इति ग्रहेन अनञ नञ् अनेकं सुबन्तं समर्थं उत्तरपदेन सुबन्तं समर्थेन सह विभा-
षा समस्यते तत्पुरुषश्च समासो भवति एकत्वात् उत्तरपदमित्यधिकृत्य ॥ नलोपो नञः
नकारस्य लोपो भवति उत्तरपदे परतः ॥ तस्मान्नुडचि ॥ तस्माल्लुप्तनकारान्नञः उ-
त्तरस्याजादेरुत्तरपदस्यागमस्य नुडागमो भवति अनश्वः लोपः स्वाद्युत्पत्तिः अनश्वः
एवमब्राह्मणादयः अथ बहुव्रीहिः चित्रगो इति स्थिते उभयत्रापि जस् चित्रा गावो
यस्येति विग्रहे तत्पुरुषवर्जिते एवं अस्मिन्नेवाधिकारे शेष बहुव्रीहिरिति वर्त्तमाने अ-
नेकमन्यपदार्थे अनेकं सुबन्तं समर्थं समस्यते बहुव्रीहिसंज्ञकश्च समासो भवतीति
थेव सुपि लुकि कृते स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी-
प्रियादिषु भाषितपुंस्कादनूङः स्त्रीप्रत्ययस्य पुंशब्दवत् आदेशो भवति पूरणी प्रिया-
दिवर्जिते समानाधिकरणे स्त्रीलिंगे उत्तरपदे परत इति पूर्वपदस्य पुंवद्भावः गोस्त्रियो-
रुपसर्जनस्य ॥ उपसर्जनगोशब्दस्य उपसर्जनस्त्रीशब्दस्य च ह्रस्वो भवति स च पद उ॰

ह्रस्वे गोरिति गोकारस्य उकारः प्रातिपदिकात्स्याद्युत्पत्तिः चित्रगुः यथानमालूवरू
पनुधा एवं शबलगु नीलगु अत्यतयः रूपवती भार्या अस्येति विग्रहे एवं तत्समासे कृ
ते पुंवद्भावो ह्रस्वत्वं स्याद्युत्पत्तिः रूपवद्भार्यः प्राप्ताः अतिथयः यं ग्रामं प्राप्तोदको
नेन उपहृतपशुरस्मै रुद्रः ऊढः रथो येन स्याः वीराः पुत्रा अस्मिन्निति विग्रहे प्रथमार
र्थं वर्जयित्वा समस्तविभक्त्यर्थेषु एवं बहुव्रीहिः शेषं समानम् प्राप्तातिथिर्ग्रामः ऊढर
थोऽनड्वान् उपहृतपशुः रुद्रः ऊढतोदना ... लोप्र ... समासान्तो कृते ... वीरपुरुषको
ग्रामः नरप्रत्यन्तः कावितिरोपि ... भाषितकपुस्त्ययः बहुव्रीहौ समा
समस्तं समासपदानां प्रथमान्तं विशेषणत्वादनियमेन पूर्वनिपातः प्राप्ते ॥ सप्तमी
विशेषणे बहुव्रीहौ ॥ बहुव्रीहौ समासे यत्सप्तम्यन्तं यच्च विशेषणं पदं तत्पूर्वं नि
पततीति विशेषणपदस्य पूर्वनिपातः सर्वत्र बहुव्रीहिर्भवति कथं
चित्रविविधपुष्पफलतरुवनोपशोभितोद्यानभूमिकं नगरमित्यत्र चित्राणि च ता
नि विविधानि चेति विशेषणं पुष्पाणि च फलानि चेति चार्थे द्वन्द्वः समासः तरूणां वन
तरुवनमिति षष्ठीसमासः चित्रविविधानि फलानि येषां तानि चित्रविविधानि पुष्प
फलानि च तानि तरुवनानि चेति पुनर्विशेषणसमासः उद्यानस्य भूमिरुद्यानभूमिः

विति षष्ठीसमासः चित्रविविधपुष्पफलऽरूपवनैरुपशोभितेति विग्रहे कार्त्वकारणे
कृत्वाबड्ले कर्त्तरि च करणे घात्तृतीया विहिता ऽहंतं शब्दरूपं कृदंतेनोत्तरपदे
न सह बड्ले समस्यते तत्पुरुषसंज्ञकश्च समासो भवति सा ऽध्यानभूमिर्यस्मिन्न
गरे ऽचित्रविविधपुष्पफलतरुवोपशोभिताध्यानभूमिकं नगरमिति बहुव्रीहि
समासः ऽपशोभिताशब्दस्य विग्रहः प्रविशित्वाहिता पुंवद्भावः शेषाद्विभाषेति
कप्रत्ययः स्वाद्युत्पत्तिः ऊँऽशब्दवद्रूपनयः एवंविधपुष्पफलालंकृतनगरम
नाद्वतीरावरपर्वतोरम्याः ॥ **इत्याह** ॥ **अथद्वन्द्वः** ॥ पट्ठगमद्वइगमइतिस्थिते
ऽभयत्रापिस इतरेतरयोगे च शब्दप्रयोगः पट्ठश्चतमश्च शद्वश्च शमश्चेति विग्रहेत
त्पुरुषवर्जितेद्वंद्वस्मिन्नेवाधिकारे अनेकमन्यपदार्थे इति वर्त्तमाने ॥ **चार्थेद्वन्द्वः** ॥
चार्थे वर्त्तमानेमनेकं सुबंतं समर्थेन सुबंतेन सह समस्यते द्वंद्वसंज्ञकश्च समासो
भवति समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थः तत्र समुच्चयान्वाचययोरसमा
सो नासामर्थ्यत्वात् इतरेतरयोगसमाहारे च समासो भवति द्वंद्वः एवं वत्तमोऽल्प
क एवं वचश्च शब्दनिष्पत्तिः ॥ **द्वन्द्वोच** ॥ द्वंद्वसमासश्चान्ते एवं निपतति इतरेतरयो
गसमाहारात्समवेत्वहि वचनमेवभवति पट्ठगमोश्चद्वइगमोपवमस्रिपूर्वोऽरूपवंत

वित्यादि नक्तंः शशास्तलत्त्वयोः इति स्थिते स्वाद्युत्पत्तिः समाहारे शब्दप्रयोगः नक्तंः
शशाशश्चस्तलत्त्वश्चत्वयोश्चेति विग्रहे समाहारे द्वंद्वः समासः नवैव सस्तक ग्र
यते ग्रशविचारेते चशब्दं द्वंद्वः समास एवं निपतत्यस्त्वं त्वस्तलत्त्वयोः शब्द
योः एवं निपतन्ति नक्तंशशास्तलत्त्वयोः म विभाषा वृक्षमृगतृणधान्यव्यंजनप
शुशकुन्यश्ववडवपूर्वापराधरोत्तराणां वृक्षादयो नामशब्दानां द्वंद्व विभाषैकवद्भव
ति न तु समकमिति न तु समकलिंगो भवति एकवद्भवति एकवद्भावे एकवचनं भवति एक
वद्भावाभावपक्षे ऽद्रुमयमप्यनेन भवति उदूखलमुसले उदूखलमुसलयोः म सत्त्वयो
यो उदूखलं च उदूखलं च यववादिरं यववादिरौ इत्यादि ॥ इति समासः खनतः ॥ कृवि
त्समासेपि विभक्तयः ॥ यत्र तत्र समासे समासो वेति संदेह उपजायते अतस्त्नि
वृत्यर्थमनेकविधिकारः प्रदर्श्यते अनन्तरं तत्पदे सप्यो धातुप्रातिपदिकयोरिति समास
प्रातिपदिकावयवस्य सुपो लुक् स्यात् समासप्रत्ययेषु अलुगधिकारः प्रागानङः उप
रोधिकः प्राक्तनादिकारान् स्तोकम्‌क्तान्तिकार्‌उदूराणादत्र कृच्छ्र इति स्थिते कारणे
च स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेपयस्याससत्त्ववचनस्य ॥ स्तोक ॥ अल्पकृच्छ्र कतिपया उ
क्तेतेभ्यः असत्त्ववचनेभ्यः करणे कारके अन्यतरस्यां पंचमी विभक्तिर्भवति इह वांतिकं

ऽलं‍ १७

७१

ऽलं‍ १७

र्थैः षष्ठ्यन्यतरस्यां पंचम्यनुवर्त्तते दूरांतिकार्थैः शब्दैर्योगे षष्ठी विभक्तिः भवति अन्य
तरस्यां पंचमी च इति दूरांतिकशब्दाभ्यामिति पंचमी स्तोकांतिकदूरार्थकृच्छ्राणि
क्तेन स्तोकादयः शब्दाः पंचम्यंताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च समासो भव
ति समासत्वात्प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सुपि लुकि प्राप्ते
पंचम्याः स्तोकादिभ्यः ॥ स्तोकादिभ्य उत्तरस्याः पंचम्या अलुग्भवति स्तोकान्मुक्तः
अंतिकान्मुक्तः दूरादागतः कृच्छ्रान्मुक्तः ओजस् कृतम् सहस् कृतम् अम्भस्
कृतम् तमस् कृतम् इति स्थिते कर्तृकरणयोस्तृतीया च कर्तृकरणे कृता बहु
लं कर्तरि करणे च या तृतीया तदंतं कृदंतेन सह बहुलं समस्यते तत्पुरुषश्च समा
सो भवति ततः प्रातिपदिकत्वे सुपो लुकि प्राप्ते ओजःसहोम्भस्तमसस्तृतीयायाः
ओजस् सहस् अम्भस् तमस् अञ्जस् इत्येभ्यः परस्यास्तृतीयाया अलुग्भवति ओजसा
कृतम् अम्भसाकृतम् तमसाकृतम् अञ्जसाकृतम् इत्यादि मनसाज्ञा मनसासंग
ता इत्यत्र पूर्ववत्तृतीयासमासस्तथा ततो लुकि प्राप्ते मनसः संज्ञायां मनस्शब्दात्पर
स्यास्तृतीयाया अलुग्भवति संज्ञायां विषये मनसासंगता मनसाज्ञाति किम् मनो
देता कन्या ॥ मनसा आज्ञात्मयूलस्पेति विग्रहे सुपि ज्ञातो णिनि ताच्छील्ये इति

हें॰ पा॰ ७२

72

णिनिप्रत्ययः आत्मेयाश्विणतोः इति कमागमः सोचीतिदीर्घः एवं चतुर्थीयाम
मासाश्च ततोलुकि प्राप्ते ॥ आज्ञायिनि चोत्तरपदे मनसः परस्यास्तृतीयाया अ
लुग्भवति मनसाज्ञायी आत्मनपदस् आत्मनभाषा इति स्थिते चतुर्थ्या इति योग
विभागाश्चतुर्थ्या इति पुनः चतुर्थ्या इति योगविभागाश्चतुर्थ्या इति पुनः चतुर्थ्या इति यो
गविभागात् समासे कृते ततो लुकि प्राप्ते वैयाकरणाख्यायां चतुर्थ्याः वैयाकर
णानामाख्या वैयाकरणाख्या आख्या संज्ञा यया संज्ञा वैयाकरणा एव व्यवहर
ति तस्यां गम्यमानायाम् आत्मन शब्दादुत्तरस्याश्चतुर्थ्या अलुग्भवति आत्मनेपदम्
आत्मनेभाषा अथवा लुग्विधानसामर्थ्यादेव चतुर्थीसमासश्च वेदितव्यः सेभाव
श्च वेदितव्यः ॥ परपदं परभाषा इति स्थिते एवं चतुर्थीसमासश्च सेभावश्च भव
ति ततो लुकि प्राप्ते ॥ परस्य च ॥ परस्य च या चतुर्थी तस्या वैयाकरणाख्यायाम् अलु
ग्भवति परस्मैपदं ॥ परस्मैभाषः ॥ युधिष्ठिरः गविष्ठिरः त्वचिसारः अरण्येतिलकाः
अरण्येमाषकाः इति स्थिते ॥ संज्ञायाम ॥ संज्ञायां विषये सप्तम्यन्ते सुपा सह समस्य
ते तत्पुरुषश्च समासो भवति ततः सुपो लुकि प्राप्ते हलन्तात्सप्तम्याः संज्ञायां हल
न्तादन्ताद्वा परस्याः सप्तम्या अलुग्भवति संज्ञायां विषये [illegible] भाण्डकपर्मख्यानम

उं॰ ७२

दासिस्रूपकरविसूपकरूपरिमाषकः हूविषाणाम् उत्तरकार्षापणः इति स्थिते संज्ञा
यामिति समासः ॥ कारनाम्नि च प्राचां हलादौ ॥ प्राचां देशे यत्कारनाम तस्मिन्
मन्तादावुत्तरपदे हलन्तादनतः उत्तमस्याः सप्तम्या अलुग्भवति कारविशेषस्येताः संज्ञा
कारो राजग्राह्यो निवेशः कार्षिकाः कल्पिताः एवंनेवसिद्धे नियमार्थमिदं प्राचामेव
कारनाम्न्येव हलादाविति नान्यस्मिन्निति प्राचामिति किम् यथेपशुः एयपशु
मध्ये गुरुः सप्तमीति योगविभागात्समासः ततो लुग्विकल्पः ॥ मध्याद्गुरौ ॥ मध्याश
ब्दादुत्तरस्याः गुरावुत्तरपदे अलुग्भवति अतस्तेन्य वक्ष्यमाणे गुरुः कंठेकालः उ
रसिलोपः उरेमणिः इति स्थिते कंठेकालोऽस्येति कंठेकालः उरसिलोमान्यस्य
ति उरसिलोमा उरेमणिरस्येति उरेमणिः सर्वत्र योगविभागात्सप्तमीति समासः
ततो लुग्विकल्पः ॥ अमूर्धमस्तकात्स्वांगादकामे ॥ मूर्धमस्तकवर्जितात्स्वांगवा
चिनः परस्याः सप्तम्या अलुग्भवति कामवर्जिते उत्तरपदे परतः अमूर्धमस्तकादि
ति किं मूर्धशिखः अकाम इति किं मुखेकामोऽस्येति मुखकामः हस्तेबन्धः चक्रेब
न्धः चक्रबन्धः इत्यत्र सिद्धमप्राप्तमलुग्विकल्पः ॥ सिद्धारिति समस्य सप्तम्यास्ते
तत्पुरुषः समासो भवति लुग्विकल्पः एवं बन्धे च विभाषा ॥ बंधमाहे ॥ उत्तरपदे

वै॰ पा॰ ७३

73

सप्तम्या विभाषा अलुग्भवति स्तंभेरमतीति कर्णेजपः उपपदसमासः स्वपोल्लकि प्राप्ते ॥
तत्पुरुषे कृति बहुलं ॥ तत्पुरुषे समासे कृदंते कृदंते उत्तरपदे सप्तम्या बहुलमलु
ग्भवति [illegible] भवति कुरुचरः मूरकचरः खेशाते खेशयः खशयः ग्रामेवासः ग्राम
वासः ग्रामीवासी उपपदसमासः ॥ शयवासवासिष्वकालात् ॥ शयादिषूत्तर
पदेष्वकालवाचिनः परस्याः सप्तम्या अलुग्भवति विभाषा ॥ वोरस्यत्रा ॥ ग्रस्त
दास्याः पतिः अत्र षष्ठीसमासे कृते स्वपोल्लकि प्राप्ते ॥ षष्ठ्या आक्रोशे उत्तरपदेप
रतः षष्ठ्या अलुग्भवति आक्रोशे गम्यमाने आक्रोशो निन्दा सा चालुकेव द्योत्यते
आक्रोश इति किं ब्राह्मणकुलं षष्ठीप्रकरणे ॥ वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूप
संख्यानं ॥ वाचोयुक्तिः दिशोदण्डः पश्यतोहरः दास्याः पुत्रः दासीपुत्रः अत्रापि लु
कि प्राप्ते ॥ पुत्रेन्यतरस्यां ॥ पुत्रशब्दे उत्तरपदे षष्ठ्या आक्रोशे गम्यमानेऽन्यतर
स्यामलुग्भवति आक्रोशेनेत्येव ब्राह्मणपुत्राः पितुः पुत्रः पितुरन्तेवासी होतुः पु
त्रः होतुरन्तेवासी अत्रापि लुकि प्राप्ते ऋतो विद्यायोनिसम्बन्धेभ्यः परस्याः
षष्ठ्या अलुग्भवति मातुः स्वसा पितुः स्वसा अत्रापि लुकि प्राप्ते विभाषा स्वसृप
त्योः स्वसृपति इत्येतयोरुत्तरयोः ऋकारान्तेभ्यः परस्याः षष्ठ्या अलुग्भवति वि

ओं॰ ७३

भाषायामलुक् नद्या मातृपितृभ्यां स्वसः मातृपितृभ्यामुत्तरस्य स्वसृसकारस्य मूर्ध-
न्यादेशो भवति मातृष्वसा भाषायामलुक् नद्या मातृपितृभ्यामन्यतरस्यां मातुर् पितु-
र् इत्येताभ्यामुत्तरस्य स्वसृसकारस्यान्यतरस्यां मूर्धन्यादेशो भवति मातृष्वसा पितृ-
ष्वसा मातुःष्वसा पितुःष्वसा मातुःष्वसा मातुः स्वसा पितुः स्वसा होतृपोतृनेष्टृ-
नेतृ उद्गातृप्रशास्तृप्रतिहर्तृप्रतिस्थितानां कृतद्वन्द्वानामुपनीतरूपाणां ॥ आनङृ-
तो द्वन्द्वे ॥ ऋकारान्तानां विद्यायोनिसंबंधिवचनानां यो द्वन्द्वस्तत्रोत्तरपदे परे पूर्वपद-
स्य आनङ् आदेशो भवति होतापोतारौ नेष्टानेतारौ नेष्टोद्गातारौ प्रशास्ताप्रतिहर्ता-
रौ योनिसंबंधिनां मातापितरौ जामातानन्दारौ इन्द्रावरुणौ इन्द्रासोमौ इन्द्रपूषा-
णौ इन्द्राबृहस्पती इन्द्रपूषणौ पूषणमिपि कृतद्वन्द्वानां देवताद्वन्द्वे च ॥ देवतावाचि-
नां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति इन्द्रावरुणौ इन्द्रासोमौ इन्द्राबृ-
हस्पती इन्द्रापूषणौ अग्निसोमौ अग्निवरुणौ अग्ने ईत् सोमवरुणयोः सोमवरुण-
योरुत्तरपदयोः अग्नेरीकारादेशो भवति देवताद्वन्द्वे चेत्यनङोपवादः अग्नीसोमौ अग्नी-
वरुणौ अग्नीषत्तसोमसोमयोरिति षत्वं .... इद्वृद्धौ ॥ कृतवृद्धावुत्तरपदे पू-
र्वदेवताद्वन्द्वे अग्नेरिकारादेशो भवति अग्निवरुणीमानड्वाहीमालभेत आग्निमारुत

क्रियतेअग्निवारुणौदेवतेअस्याः अग्निमारुतौदेवतेअस्याः इतितद्धितः तत्रदेवताद्वंद्वं
चेदमुभयत्रवृद्धौकृतायांईद्वान्नेराधित्वादिकारःक्रियतेइति अपत्याधिकारःसमा
प्तः ॥ अथसर्वेषामपत्यादर्थविशेषतद्धितप्रत्ययानि उक्तंतत्वाश्रितत्वाच्चसर्व
नंतरंसंक्षेपेनोपदिश्यते उपगोरपत्यमितिविग्रहेप्रत्ययःपश्चात्प्रातिपदिकात्तद्धि
ताःसमर्थानांप्रथमाद्वा आम्नोव्यतौ इति इतिवर्तमाने ॥ तस्यापत्यं ॥ तस्येतिष
ष्ठीसमर्थादपत्यमित्यस्मिन्नर्थेयथाविहितंप्रत्ययोभवति इत्यण् तद्धितत्वात्कृत्त
द्धितसमासाश्चेतिप्रातिपदिकसंज्ञायांसुपोधातुप्रातिपदिकयोरितिसुपोलुकच
कोनिमातीत्यपिकृत्य ॥ तद्धितेष्वचामादेः ञ्णितिणितिचतद्धितेपरतः अचामा
देः ॥ अचोवृद्धिर्भवतीति उकारस्योकारोवृद्धिः यचिभमितिपूर्वस्यभसंज्ञायांअग
स्यतस्यनतद्धिते इतिवर्तमाने ॥ ओर्गुणः ॥ उवर्णान्तस्यभस्यभसंज्ञकस्यगुणो
भवतितद्धितेपरतः इत्युकारस्योकारोगुणोभवति अवादेशः ततःप्रातिपदिकात्स्त्री
त्वात्प्रत्ययाः औपगवः औपगवाविति आदि ॥ हलश्चवत्तस्त्रियामित्यनुवर्तमाने
टिड्ढाणञितिङीप् यस्येतिचेत्यकारलोपः औपगवी ॥ गोत्रविवक्षायामपत्यंपौ
त्रप्रभृतिगोत्रं तस्यापत्यंपौत्रप्रपौत्रप्रभृतिर्यदपत्यंतद्गोत्रसंज्ञंभवति औपगवस्य

पत्यंगोत्रमितिगोत्रापत्यविवक्षायामेकागोत्रएकशब्दः प्रथमपर्यायः गोत्रेएकः प्रथमः
प्रत्ययोभवतिगोत्रेएकएवप्रत्ययोभवतिप्रथमोवाएकएवपरमप्रकृतेर्भवतीत्यतोवभवति
औपगवः पौत्रः औपगवस्यैकवापत्यविवक्षायांजीवत्यतुवंश्येकवाविद्ययाजन्मनावाप्रा
णिनामेकलक्षणसंतानोवंशः तत्रभवोवंश्यः तस्मिन्नपपित्राहौजीवतिसतिपौत्रप्र
भृतेरपत्ययुवसंज्ञंभवतिइतिचतुर्थीयुवसंज्ञया सौपगवस्यापत्यंयुवाइतिविग्रहेगो
त्राद्यूनः स्त्रियामप्रथमपिनियमः यतिप्रत्ययेविवक्षितेगोत्रप्रत्ययादेवप्रत्ययोभवति
नपरमप्रकृतेस्तस्यवत्वाइतिऔपगवशब्दात्फकारांतादेवंसर्वविकारेतस्यापत्य
मित्यवर्तमाने ॥ अतइञ् ॥ षष्ठीसमर्थादकारांतात्प्रातिपदिकात्तस्यापत्यमित्यस्मि
न्नर्थेइञ्प्रत्ययोभवति ॥ पवादः नकारावृद्ध्यर्थः एवंवक्तुंसंज्ञायांयस्येतिचेत्य
कारलोपः स्वाद्यत्पत्तिः औपगविरेकवा ॥ मतस्यापत्यामातावियहेएवंवक्तुंत्रातांइ
ञ् अतइवस्वलोपः एवंवक्तुंपोल्लुक आदिवृद्धिः स्वाद्युत्पत्तिः दाक्षिः दाक्षिरपत्यंगो
त्रमितिगोत्रापत्यविवक्षायांएवंवक्तेकोगोत्रेइति नियमात्प्रथमप्रकृतेस्तदेवंशब्दा
त्प्रथमः प्रत्ययइञेवभवतिदाक्षेपौत्रः माक्षेरपत्यंयुवेतियुवापत्यविवक्षायांएवं
वद्यूनः स्त्रियाम इतिनियमान्नत्राक्षित्यःफगित्यपिद्रष्टव्य ॥ बाह्वादिभ्यश्च ॥ यत्वंता

है॰ पा॰ ७५

75

न् इनंतात्चापत्यमित्यस्मिन्नर्थे ढक प्रत्ययो भवति ककारस्य लोपः प्रयोजनम् किमिति चे
ति विशेषणार्थः पोल्व क तद्धितेष्वचामादेरित्यपि ह्रार्थम् ॥ किति च ॥ किति च तद्धि
ते परतो गस्याचामादेरचो वृद्धिर्भवति पजे णिष्व ह्रत्वणः प्रवृत्ति आयनेयीनीयियः फ
ढखछघां प्रत्ययादीनां प्रत्यवस्थाभूतदीनाम् फढखछघां आयन् एयन् ईयन् इयाचय
इत्युक्तेन आदेशा भवंति यथासंख्येनेति फस्य जानमात्रस्यैव आयनादेशः प्रस्या
तिचत्यकारस्य लोपः रषाभ्यामिति णत्वम् दाक्षायणः दाक्षायणौ दाक्षायणा इत्यादि ग
र्गस्यापत्यमिति विग्रहे अतः इञिति इञ् प्रत्ययः शेषं पूर्ववत् गार्गिरपत्यमिति वि
ग्रहे गोत्रापत्यविवक्षायां सिंज बाधितः ॥ गोत्रे कुंजादिभ्यः फ गिति वर्त्तमाने गर्गादिभ्यो
यञ् गर्गादिभ्यः प्रातिपदिकेभ्यः गोत्रापत्यं यञ् प्रत्ययो भवति शेषं पूर्ववत् गार्ग्यः गा
र्ग्यौ गार्ग्याः अपत्यबहुत्वविवक्षायाः उत्पन्नस्य यञ्जः अञश्च बहुषु तेनैवास्त्रियामि
ति वर्त्तमाने यञिञोश्च ॥ गोत्रप्रत्यययोर्बहुषु वर्त्तमानयोः यञिञोर्लुग्भवति नि
मित्ताभावे नैमित्तिकस्याप्यभाव इति वृद्ध्यभावः गर्गा इत्यादि ॥ युवापत्यविवक्षायां
गर्गस्यापत्यं युवेति विग्रहे गोत्रप्रत्ययात् यञिञोश्चेति फक् शेषं पूर्ववत् गार्ग्यायणः
गार्ग्यायणौ गार्ग्यायणा इत्यादि ॥ कषायेण रक्तमिति विग्रहे अपत्यवर्जिते पूर्वस्मिन्नर्

ङ॰ ७५

वापिकारे ¨ तेनरागात् तेनेतितृतीयासमर्थाद्रागविशेषवाचिनःशब्दाद्रक्त
मित्येतस्मिन्नेवार्थे यथाविहितं प्रत्ययो भवति इत्याण् प्रत्ययः शेषं पूर्ववत् का
षायः पटः काषायी शाटी टिड्ढाणञिति ङीप् काषायी पटी काषायं वस्त्रं लाक्षया
रक्तमिति विग्रहे लाक्षारोचनाशकलकर्दमाट्ठक् एभ्यो रागविशेषवाचिभ्यस्तृती
यासमर्थेभ्यः रक्तमित्येतस्मिन्नर्थे ठक्प्रत्ययो भवति अणोपवादः शेषं पूर्ववत्
ठस्येकः ठकारप्रत्ययस्येकादेशो भवति अन्यत् पूर्ववत् लाक्षिकः एवं त्रिलिंगे
योज्यम् एवं रौचनिकः शाकलिकः कार्दमिकः इत्यादि इन्द्रो देवता यस्येति विग्र
हे साऽस्य देवता ॥ स्येति प्रथमासमर्थादस्य देवतेत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो
भवति इत्याण् शेषं पूर्ववत् पञ्चम्यालोपकः एवं त्रिलिंगे योज्यम् शुक्रो देवता
अस्येति विग्रहे शुक्राद्घन् शुक्रशब्दात् अस्य देवतेत्यस्मिन्नर्थे घन्प्रत्ययो भवति अ
णोपवादः नकारः स्वरार्थः आयनेय्यादिना घस्य इयादेशः इय इत्यादिना वा शु
क्रियं हविः कालाभ्यां सम्बद्ध इति विग्रहे तस्य सम्बद्धः तस्येति षष्ठीसमर्थात् सम्बद्ध
इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्याण् अन्यत्समानं कालकम् शाकं
सवार्कम् इत्यादि घृपानां सम्बद्ध इति विग्रहे अचित्तहस्तिधेनोष्ठक् अचित्ता

र्थे त्यः शाब्देत्यः हास्तिधेनुशब्दाभ्यां चटक्प्रत्ययो भवति तस्यास्तूह इत्येतस्मिन्नर्थे
हस्त्येक इत्येकादेशः शेषं पूर्ववत् एवमपि वा शाष्कुलिकं हास्तिकमित्यत्र देरिति
वर्तमाने ॥ नस्तद्धिते ॥ नकारांतस्याभस्य टेर्लोपो भवति भसंज्ञानिमित्ते तद्धिते
परतः इति टिलोपः इकादेशः धेनुकमित्यत्र ऽइसुसुक्तान्तात्कः इस उस इत्येवमं
तादिकारांतात्प्रत्ययः कः इत्ययमादेशो भवतीति कादेशः ॥ व्याकरणं वेत्यधी
ते वा इति विग्रहे तदधीते तद्वेदेति द्वितीयासमर्थादधीते वेद इत्येतयोरर्थ
योर्यथाविहितं प्रत्ययो भवति इत्यण् आकारलोपः नयाभ्यां पदांताभ्यां पूर्वौ ताता
भ्यामैच् पदांताभ्यां यकारवकाराभ्यां उत्तरस्याणस्य चापादेर्वा वृद्धिर्न भवति ता
भ्यां पूर्वमैचागमो भवति वैयाकरणः एवं कौरसः नैमित्तः उदुम्बराः अस्मिन्देशे सन्तीति
विग्रहे तस्मिन्नस्तीति देशे तन्नाम्नि चेति प्रथमासमर्थादस्मिन्नित्यस्मिन्नर्थे यथा
विहितं प्रत्ययो भवतीत्यण् तत्र यत्तत्प्रथमासमर्थं तदस्ति चेदस्मिन्निति निर्दिष्टं दे
शश्चेत्तत्तन्नाम प्रत्ययांतं तन्नामा भवति इति कारणं तत्र स्त्रिविवक्षाशेषं समानन्त्व
औदुम्बरः वारदः महद्वैणा निर्वृत्ता परिखेति विग्रहे तेन निर्वृत्तं तेनेति तृतीया
समर्थान्निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् टिड्ढाणञिति ङी

पं. ७६

76

ऊं ७६

ष्ट्र साहस्री परिव्राजकजनावोस्य निवास इति विग्रहे तस्य निवासः देशनामधेये ग
म्यमाने शेषं समानं आर्जुनावाः विदिशाया अदूरभवनमिति विग्रहे अदूरभवश्च स
मर्थे विभक्तिरनुवर्तते तस्येति षष्ठीसमर्थाद् अदूरभाव इत्येतस्मिन्नर्थे यथाविहितं
प्रत्ययो भवतीत्यण् शेषं समानम् वैदिशं नगरम् चतुर्ष्वर्थेष्वन्ते श्रवणेन दृश्यते
इति विग्रहे शेषवाक्येषु अपत्यादिभ्योऽन्यो भवश्चेत्य तत्पर्यंत अपत्यादिभ्यश्चातुरर्थ
पर्यंतेभ्यो येन्यार्थाः स शेषः शेष इति लक्षणं चाधिकारश्च शेषार्थेषु यथाविहितं प्रत्ययो
भवतीत्यण् यानित ऊर्ध्वमनुक्रमिष्यामः शेषार्थे वेदितव्याः शेषं समानं चाक्षुषं रूपं
श्रावणः शब्दः स्रुघ्ने जात इति विग्रहे शेष इति वर्तमाने तत्र जातः तत्रेति सप्तमीति स
मर्थाज्जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् शेषं समानम् स्रौघ्नः मा
थुरः ग्रामे जातः इति विग्रहे शेष इति वर्तमाने ॥ ग्रामाद्यखञौ प्रत्ययौ भवतः तत्र जा
त इति विषये शेषे ग्रामाद्युपवादः यस्येति चेत्यकारलोपः खकारो ईनेयादिति खस्य ई
नादेशः शेषं समानं ग्राम्यः ग्रामीणः राष्ट्रे जात इति विग्रहे राष्ट्राद्घः राष्ट्रशब्दा
त्सप्तमीसमर्थाज्जाता इत्येतस्मिन्नर्थे घप्रत्ययो भवति पकारलोपः इयकारादेशः
राष्ट्रियः कोवत्सः स्रुघ्ने भवतः इति विग्रहे तत्र भवः तत्रेति सप्तमीसमर्थाद्भव इत्ये

तस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् घोषे समानम् स्रौघ्नः माथुरः तथैव या
मशाह्वः इवेवेर्थे यथाव ञो भवतः ग्राम्यः ग्रामीणः दिशि भवा इति विग्रहे तत्र भव इत्येत
स्मिन्नर्थे इकारस्तित्वादिति तमिति विशेषणार्थः दिश्यं एवं वर्ग्यम् प्रगण्यम् ग्राम्यम् मध्य
मांसं गण्यमित्यादि ॥ दंते भव इति विग्रहे शरीरावयवाच्च शरीरावयववाचिनः प्राति
पदिकाद्यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे शेषं पूर्ववत् दन्त्यम् कण्ठ्यम् ओष्ठ
म् इति अंतर्गेहे भवमिति विग्रहे ॥ अंतःपूर्वपदाट्ठञ् ॥ अंतःपूर्वपदात्सव्ययीभावा
त् ठञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे शेषं पूर्ववत् आंतर्गेहिकं अंतस्थालिकं
अव्ययीभावः शरत्प्रभृतिभ्यो न इत्यकारः समासांतः अध्यात्मने भव इति विग्रहे अ
ध्यात्मादित्वादुपसंख्यानेन इति ठञ् प्रत्ययः अन्यत्समानं आध्यात्मिकम् आधिदैवि
कं आधिभौतिकं अनुशातिकादीनां च अनुशातिक इत्येवमादीनां संगानां पूर्वपद
स्याद्यचस्य च वा आदेरचो वृद्धिर्भवति कित्ति णिति णिति वा परतः आनुशातिक
तथैव वैदिकः दैविकः लौकिकः स्त्रियादि ड्ढाणञिति ङीप् लौकिकी वैदिकी
कीति अध्यात्मादिराकृतिगणः स्रुघ्नादागत इति विग्रहे ततः आगत इति पंच
मी समर्थादागत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् स्रौघ्नः माथुरः त

थैव ग्रामादागत इत्येतस्मिन्नर्थे यखञौ प्रत्ययौ भवतः ग्राम्यः ग्रामीणः शुल्कशाला
याः आगत इति विग्रहः ॥ ठगायस्थानेभ्यः ॥ आय इति स्वामिग्राह्यो भाग उच्यते तदय
स्मिन्नुत्पद्यते तत् आयस्थानम् आयस्थानेवाच्यत्वः शब्देभ्यः ठक्प्रत्ययो भवति तत
आगत इत्येतस्मिन्नर्थे शेषं पूर्ववत् शौल्कशालिकः आपणिकः आकरिकः
स्रुघ्नो निवास इति विग्रहे सोऽस्य निवासः ॥ स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे निवा
स इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् यत्र प्रथमासमर्थं निवासश्चे
तद्भवति निवसन्त्यस्मिन्निति निवासो देश उच्यते शेषं पूर्ववत् स्रौघ्नः माथुरः त
थैव ग्रामशब्दान्निवास इत्येतस्मिन्नर्थे स्रौघ्नः माथुरः तथैव ग्रामशब्दान्निवास इत्ये
तस्मिन्नर्थे यखञौ भवतः ग्राम्यः ग्रामीणः माथुरेण प्रोक्तमिति विग्रहः ॥ तेन प्रो
क्तं ॥ तेनेति तृतीयासमर्थात्प्रोक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्य
ण् वृद्धाच्छाणिभ्यादिना ईपु माथुरी भक्तिः पाणिना प्रोक्तमापिशलिना प्रोक्तमिति
विग्रहे तेन प्रोक्तमित्यण् प्राप्ते वृद्धिर्यस्याचामादिस्तद्वृद्धं यस्य प्रातिपदिकस्याचामादिर
च् वृद्धिसंज्ञो भवति तत्प्रातिपदिकं वृद्धसंज्ञं भवति वृद्धाच्छः ॥ वृद्धात्प्रातिपदिकात
छप्रत्ययो भवति पाणिनशब्दाच्छप्रत्ययः आपिशलिशब्दादिञश्चेति इञन्तादण्वा

प्रत्ययापवादः॥ शेषं समानम् पाणिनीयं शास्त्रं आपिशलं शास्त्रं पाणिनीयमः
धीयते आपिशलमधीयते इति विग्रहे पुनः तदधीते तद्वेद इत्यण् तस्य प्रोक्ताल्लु
क् तेन प्रोक्तमित्येतस्मिन्नर्थे यो विहितः स प्रोक्तग्रहणेनोच्यते तस्मादुत्तरस्य तद्धि
तस्य लुक् भवति पाणिनीयाः छात्राः वररुचिना कृताः श्लोका इति विग्रहे कृ
ते ग्रन्थे तेनेति वर्त्तते तृतीयासमर्थात् कृते इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवती
त्यण् यद्वृत्तमग्रन्थस्थं भवति शेषं समानम् वाररुचाः श्लोकाः एकमेव ग्रन्थः उ
पगोरिदमिति विग्रहे तस्येदं तस्येति षष्ठीसमर्थादिदमित्येतस्मिन्नर्थे यथा
विहितं प्रत्ययो भवतीत्यण् शेषं समानम् औपगवम् कापवम् रथस्येदमिति
विग्रहे रथाद्यत् रथशब्दात् यत्प्रत्ययो भवति तस्येदमित्येतस्मिन्नर्थे रथ्य इति र
थ्यम् रथाङ्गमुच्यते अश्मनो विकारः भस्मनो विकारः इति ग्रहे तस्य विकारः त
स्येति षष्ठीसमर्थाद्विकार इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् भंस
न्नायान्तस्य टि लोपे इति टिलोपापवादः अन् इति प्रकृतिभावे प्राप्ते अश्मनो वि
कारे उपसंख्यानमिति आश्मन् शब्दस्य टिलोपः अन्यत्र प्रकृतिभाव एव आश्म
भास्मनः अक्षैर्दीव्यति शलाकाभिर्दीव्यति इति विग्रहे प्राग्वहतेष्ठगिति वर्त्तमाने।

तेनदीव्यतिखनतिजयतिजितंतेनेतितृतीयासमर्थात् दीव्यतिखनतिजयतिजि
तमितेतेष्वर्थेषुठक्प्रत्ययः अक्षकः शालाकिकः स्त्रियांआक्षिकीशालाकिकीद
एनसंस्कृतमितिविग्रहेतेनेतिवर्तमानेसंस्कृतं ॥ तृतीयासमर्थात्संस्कृतमि
त्येतस्मिन्नर्थेठक्प्रत्ययः मनः तत्कषायानसंस्कारः दाधिकम् शार्ङ्गवेरिकं श
ब्दंकरोतिदर्दुरंकरोतीतिविग्रहेशब्ददर्दुरंकरोतिरितिति तृतीयासमर्था
भ्यांशब्ददर्दुराभ्यांकरोत्यस्मिन्नर्थेठक्प्रत्ययोभवतिशेषंसमानम् शाब्दिकः
वैयाकरणः दार्दुरिकः कुम्भकारः अस्तिमतिर्नास्तिमतिरस्येतिविग्रहे अ
स्तिनास्तिदिष्टंमतिः ॥ प्रथमासमर्थेभ्यः अस्तिनास्तिदिष्टशब्देभ्यः तस्येतिष
ष्ठ्यर्थेठक्प्रत्ययोभवतियत्तत्प्रथमासमर्थंमतिश्चेत्साभवतिनचमतिमात्रेप्रत्य
यइष्यतेकिंतर्हिपरलोकः अस्तिअस्तिमतिर्यस्यसआस्तिकः एवंनास्तिकः दिष्ट
मतिर्यस्यास्तिसदैष्टिकः प्रमाणिकइत्यर्थः शुल्कशालायानियुक्तः आपणेनि
युक्तः इतिविग्रहेतत्रनियुक्तः तत्रेतिसप्तमीसमर्थान्नियुक्तइत्यस्मिन्नर्थेठक्प्रत्य
योभवतिनियुक्तोऽधिकृतः व्यापारितः इत्यर्थः शौल्कशालिकः आपणिकः आ
करिकः दौवारिकइत्यर्थः द्वारादीनांच ॥ द्वारादीनांसंबंधिनौयोयकारवका

वृ॰
पा॰
७५

79

यै नात्यन्तुन्नरस्य ग्रचामादेश्चो वृद्धिर्न भवति नाभ्यात् एवं सैजागमो भवति रथं वह
तीति विग्रहे ॥ प्राग्घिताद्यत् ॥ इति वर्तमाने तद्वहति रथयुगप्रासंगं नद्धिति
द्वितीयासमर्थेभ्यो रथयुगप्रासंगशब्देभ्यो वहतेत्यस्मिन्नर्थे यत्प्रत्ययो भवति रथ्यः
युग्यः प्रासंग्यः धुरं वहतीति विग्रहे ॥ धुरो यड्ढकौ ॥ धुर्शब्दात् द्वितीया
समर्थाद्वहतीत्यस्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः ग्राम्यनादिम्नश्चेणाढ्
स्यपद्याहेयाः ग्रर्थः धौरेयः साममनुसाड्ः कर्मणि साधुरिति विग्रहे तत्र साधुः तत्रे
ति सप्तमीसमर्थात्साधुरित्यस्मिन्नर्थे यत्प्रत्ययो भवति मन्नाद्यादिलोपश्चा ।
ये चाभावकर्मणोरिति प्रकृतिभावः सामन्याः कर्मण्यः साधुरिति प्रवीणाया
रथ्याचा सभ्यते सभायां साधुरिति विग्रहे सभाया यः सभाशब्दाद्याप्रत्ययो भवति त
त्र साधुरित्यस्मिन्नर्थे सभ्यः वत्सेभ्यो हितमिति विग्रहे प्राक्क्रीताच्छ इति वर्तमा
ने तस्मै हितं ॥ तस्मै इति चतुर्थी समर्थाद्धितमित्यस्मिन्नर्थे यथाविहितं प्रत्य
यो भवतीति छप्रत्ययः खछोरीनेयादिति छस्य ईयादेशः वत्सीयो गोधुक करं
भीयः दंतेभ्यो हितमिति विग्रहे शरीरावयवाद्यत् शरीरस्य प्राणिकायः शरीरावय
ववाचिनः प्रातिपदिकाद्यत्प्रत्ययो भवति तस्मै हितमित्यस्मिन्नर्थे दंत्यं कण्ठ्यम्

डं॰
७५

ऽध्यर्धं सप्तत्या क्रीतम् अशीत्या क्रीतमिति विग्रहे प्राग्वहतष्ठगिति वर्त्तमानेन क्री
तेतेनेति तृतीयासमर्था क्रीतमिति स्मिन्नर्थे यथाविहितः प्रत्ययो भवतीति टक्प्र
त्ययः शेषं समानं साप्ततिकम् आशीतिकम् प्रागिवीयेष्वकारादेः प्रत्ययो परे
सत्यां सर्वस्य एकस्याप्यन्यस्यापि एवं बहिर्भवति संज्ञायां किमः क इति कप्रत्ययः कदा
यदा तदा ॥ इदमोऽर्हिल् ॥ इदमः सप्तम्यन्तात्काले वर्त्तमानात् र्हिल् प्रत्ययो भ
वति ॥ हस्यापवादः लकारः स्वरार्थः ॥ एतेतौ रथोः ॥ रेफादौ थकारादौ च प्रा
ग्दशीये प्रत्यये परतः ॥ इदमो यथासंख्यम् एत इत् इत्येतावादेशौ भवतः हस्या
पवादः अस्मिन्काले एतर्हि काल इति किम् अस्मिन्देशे इह अधुना अधुनेति
निपात्यते इदमः अश्भावः अधुना च प्रत्ययः अस्मिन्काले ॥ अधुना ॥ दानीं इद
मः सप्तम्यन्तात्काले वर्त्तमानात् दानीं प्रत्ययो भवति अस्मिन्काले इदानीं च त
दो दा च तदः सप्तम्यन्तात्काले वर्त्तमानात् दा प्रत्ययो भवति चकारात् दानीं च त
स्मिन्काले तदा तदानीं प्रकारवचने थाल् प्रकारवचने सति थाल् प्रत्ययो भवति
शेषं समानम् तेन प्रकारेण तथा यथा सर्वथा अन्यथा ॥ इदमस्थमुः ॥ इदं शब्दे
प्रकारवचने थमु प्रत्ययो भवति उकारो मकारस्य संज्ञापरित्राणार्थः इदमः इत्थ

रु॰ पा॰ ८०

80

इत्यधिकृत्य ॥ एतेतौ रथोः ॥ इदमः एतद् इत् इत्येतावादेशौ भवतः रेफथकारादौ
प्रत्यये परतः इति इदमादेशः अनेन प्रकारेण इत्थं ॥ किमश्च ॥ किंशब्दात्थ
कारवचने थमु प्रत्ययो भवति केन प्रकारेण कथं एवं सर्वादिभ्यो विभक्तीति विग्र
हे दिक्शब्देभ्यः सप्तमीपंचमीप्रथमान्तेभ्यः दिग्देशकालेष्वस्तातिर्वा वाचकाः श
ब्दाः दिक्शब्दात् दिग्देशकाले वर्त्तमानात् सप्तमीपंचमीप्रथमान्तेभ्यः स्वा
र्थे अस्ताति प्रत्ययो भवति यथासंख्यमत्र नेष्यते इकार अकारस्यापि तकार परित्राणा
र्थः एवं वत्सपोलक एवं धारावरणामुरधर वक्ष्यमाणमिति वर्त्तमाने । अस्ताति
च । अस्ताति च प्रत्यये परतः एवं धारावरणामुरः अधु अन्त इत्येते आदेशा भ
वंति यथासंख्येन स्वाद्यन्त्यद्रिः अध्ययारा अधस्पद इति सपोलक उपरिष्टात् वसति
उपरिष्टागतः उपरिष्टात् इमर्थ्यीयम् एवमस्तात् स्तादित्यादि संख्याया विधार्थे धा
संख्याया इत्यो विधार्थे धा प्रत्ययो भवति विधार्थः प्रकारः धा प्रत्ययान्तस्य
धातु स्वः एवं वस्त्ययत्वात् सपोलक एकधा द्विधा त्रिधा चतुर्धा पंचधेत्यादि ॥
सर्वे इमे आढ्याः अयमेषामतिशयेनाढ्यः सर्वे इमे पटवः अयमेषामतिशये
न पटुः इति विग्रहे अतिशायने तमबिष्ठनौ ॥ अतिशायने प्रकर्षः निपातना

ॐ ८०

दीर्घत्वं अतिशायनविशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे तमपिष्ठनौ प्रत्य-
यौ भवतः पकारनकारौ न्नरार्थौ स्वाद्युत्पत्तिः आढ्यतमः इतरत्र तु इष्ठेमेय-
स्सु इति वर्त्तमाने टेः इष्ठन् इमनिच् ईयसुन् इत्येतेषु परतः अंगस्य टेः लोपो भ-
वति पटिष्ठः तथा अणीयतमः लघिष्ठ इत्यादि द्वाविमावाढ्यौ अयमन-
योरतिशयेनाढ्यः द्वाविमौ पटू अयमनयोरतिशयेन पटुरिति विग्रहे द्विव-
चनविभज्योपपदे तरबीयसुनौ द्वयोरर्थयोर्वचने द्विवचनं द्विवचनविभज्ये प्रा-
तिपदिकादतिशये तरबीयसुनौ प्रत्ययौ भवतः यथासंख्यमत्र नेष्यते अत्र ब-
ल्लोपः एवं वत्स्वाद्युत्पत्तिः आढ्यतरः आढ्यत्र एवं वा हल्लोपः उगिदचामित्या-
दिना नुम् सावित्यादिना दीर्घः पटीयान् पटीयांसौ एवं अणीयतरः लघीया-
नित्यादि प्रशस्यशब्दादपि एवं अतिशायनविशिष्टेऽर्थे इष्ठन् ईयसुनोः कृ-
तयोः प्रत्यययोः भवति ततः प्रशस्यस्य श्रः प्रशस्यशब्दस्य श्र इत्ययमादेशो भवति
इष्ठन् ईयसुनोरजाद्योः प्रत्यययोः परतः श्रः प्रकृत्यैकाजित्यप्रकृत्यभाव
श्रेष्ठः श्रेयानित्यादि अनादेरिति प्रकृतस्य सप्तमी विभक्तिः पौरस्त्येनेमवेद्
मे प्रशस्यः अयमेषामेव उभौ प्रशस्यौ अयमनयोरतिशयेन श्रेयान् अय

रू॰ पा॰ ८२

सस्माच्छ्रेयानित्यादि ॥ प्रकारेगुणवचनादेवेति नियमाद्गुणवचनादेवेहस्थेयन्नैभवत ः
प्रकारवचनेजातीयन्सामान्यस्यविशेषकोभेदःप्रकारःतस्यवचनेवर्त्तमानात्स्वार्थेता
त जातीयन्प्रत्ययोभवतिप्रकारवतिजातीयन्थाल्प्रत्ययःप्रकारमात्रेजातीयन्तुतत्व
त्यदेपः तपोतमंरीतीतिविशेषणंस्वार्थप्रत्ययान्तैः पटुजातीयः मृदुजातीयः शोभनजा
तीयाइत्यादि ॥ तद्धितावतारः समाप्तः ॥ तसृपंचंस्वसंक्षेपप्राणीतंयेनलक्षण
दिव्यभाषोपसंहारेसजयन्तुपाणिनिः इहलोकेद्विविधंपदंप्रयुज्यतेसुबंतंतिङन्त
चेत्तत्रसुबंतमुक्तम् अथतिङ्विभक्तिर्यथासंभवंक्रियावाचिभ्योधातुभ्यःपरस्यलका
रस्यस्थानेसंक्षेपेणोपदिश्यतेकाचतिङ्विभक्तिः तिप् तस् झि सिप् थस् थमिप् वस्
मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इतिपकारटकारङका
रादयोऽनुबंधाःकार्यार्थः पकारःस्वरार्थः टकारःइडादिरितिविशेषणार्थः ङकारस्तिङि
तिविशेषणार्थः एवंनावपरस्मैपदंलःपरस्मैपदमितिवचनात्लादेशाःपरस्मैपदसं
ज्ञभवति परेणावात्मनेपदम् तङानावात्मनेपदमितिवचनात्तङिप्रत्याहारेणवा
नांवचनानाम् आवङितिशानच्कानचोर्ग्रहणंएवंणपरस्मैपदसंज्ञायांप्राप्तायांतङा
नयोर्वचनेनात्मनेपदसंज्ञाविधीयतेकस्यलकारःतत्रदशलकारालइत्युच्यंतेकेचन

रू॰ ८२

लट् लिट् लुट् लृट् लेट् लोट् इति षट्टितः लङ् लिङ् लुङ् लृङ् इति चत्वारो
ङितः तत्र वर्त्तमाने लट् परोक्षे लिट् अनद्यतने लुट् लृट् शेषे च लिङर्थे लेट् विधि
निमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लो[illegible] अनद्यतने लङ् आशंसावचने लिङ्
भूते लुङ् लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति विभागः एते दश लकाराः ॥ यथा लक्ष
णं धातवो विधीयंते धातवः पुनर्द्दशविधा गणाद्विविधा भवंति सकर्म्मका अकर्म्मकाश्चेति त
त्र सकर्म्मका ये कर्म्मोपेतां क्रियामाहुः ग्रामं गच्छति कटं करोति वेदमधीते इत्येवमाद
यः अकर्म्मका आस्ते शेते इत्यादयः ते पुनर्द्दशविधा भवंति विकरणप्रत्ययभेदेन
शः विकरणा भ्वादयः ॥ १ ॥ लुग्विकरणा अदादयः ॥ २ ॥ श्लुविकरणा जुहो
त्यादयः ३ ॥ श्यन्विकरणा दिवादयः ४ ॥ श्नुविकरणाः स्वादयः ५ ॥ शः विक
रणास्तुदादयः ६ ॥ श्नम्विकरणा रुधादयः ७ ॥ उविकरणास्तनादयः ८ ॥ श्ना
विकरणाः क्र्यादयः ९ ॥ स्वार्थेण्यंताश्चुरादयः ॥ १० ॥ ते पुनः सर्वे तिङ्भक्तिव
शात्त्रिविधा भवंति परस्मैपदिनः आत्मनेपदिनः उभयपदिनश्चेति कदाचिल्लक्ष्ण
तः परस्मैपदिनोप्यात्मनेपदमपि भवंति आत्मनेपदिनोपि परस्मैपदमपि भवंति
तत्रेत्संज्ञालोपः प्रयोजनं चोच्यते उपदेशे जनुनासिक इत् उपदेशो सूत्रपाठे धातुः

वृ॰ पा॰ ८२

82

पादेगणपाठे च यो जस्तु नासिकः स इत्संज्ञो भवति ॥ हलन्त्यम् ॥ उपदेशेऽन्त्यं
हल् इत्संज्ञं भवति न विभक्तौ तुस्माः विभक्तौ वर्तमानानां तवर्गसकारमका
राणामित्संज्ञा न भवति ॥ आदिर्ञिटुडवः ॥ ञिटुडु इत्येते समुदाया आदितो वर्त
माना इत्संज्ञा भवंति ञिमिदा स्नेहने निक्ष्विदा स्नेहनमोहनयोः टुवेपृ कम्पने डुडो
श्विगतिवृद्ध्योः डुकृञ् करणे डुक्रीञ् द्रव्यविनिमये डुधाञ् धारणपोषणयोः डुप
चष् पाके डुवप बीजसंताने ॥ षः प्रत्ययस्य ॥ षकारः प्रत्ययस्यादितो वर्तमान इ
त्संज्ञो भवति ॥ चुटू ॥ चवर्गटवर्गौ धातोः प्रत्ययस्यादितो वर्तमानौ चवर्गटव
र्गौ इत्संज्ञा भवतिः लकारश्चाकारकृतस्य लोपः यस्येत्संज्ञा तस्य लोपः भवति तत्रात्म
नेपदिनामकारो नुदात्तङित आत्मनेपदमिति विशेषणार्थः परस्मैपदानि उच्चार
णार्थः उभयपदिनां स्वरितञितः कर्त्रभिप्राये क्रियाफल इति विशेषणार्थः ईकारः
श्वीदितो निष्ठायामिति विशेषणार्थः उकार उदितो वेति विशेषणार्थः ऋकारो नग्लोपिशा
स्वृदितामिति विशेषणार्थः लृकारः इरुपादि यत्नाद्युदितः परस्मैपदेष्विति विशेषणा
र्थः एकारो ह्म्यन्तक्षणश्वसजागृणिश्व्येदितामिति विशेषणार्थः ओकारः ओदितश्चे
ति विशेषणार्थः ओहाक वकारोऽस्य ब्रीहिकालयोरभि विशेषणार्थः इकारः अनु

वृ॰ ८२

धातुङित आत्मनेपदमिति विशेषणार्थः इकस्मरणे ककार अधीगर्थदयेषां कर्मणी
ति विशेषणार्थः ङकारः अनुदात्तङित आत्मनेपदमिति विशेषणार्थः ञपूर्वैपोः पका
रस्याच्छ्वस्यधीति विशेषणार्थः ञिङकारो ञीतः क्त इति विशेषणार्थः नकारः स्वरित
ञित इति विशेषणार्थः धेटष्टकारः पाघ्राध्माधेट्दृशः श इति विशेषणार्थः हाणाणवौ
रः स्नाम्नमाद्यस्यातर्थे इति विशेषणार्थः टुग्रहः ट्वितोऽथुजिति विशेषणार्थः डुग्रह्वा
ड्वितः क्त्रिरिति विशेषणार्थः लटः अकारः विदो लटो वेति विशेषणार्थः लिटः इकारः
लिटः कानज्वेति विशेषणार्थः लुटः उकारः लुटः प्रथमस्य डारौरस इति विशेषणा
र्थः स इति विशेषणार्थः लृटः ऋकारः लृट् शेषे चेति विशेषणार्थः लेटः एकारः ले
टोऽडाटाविति विशेषणार्थः लोटः ओकारः लोटो लङ्वदिति विशेषणार्थः लिङ इका
रो लिङः सीयुडिति विशेषणार्थः टकारष्टित आत्मनेपदानां टेरेति विशेषणार्थः लु
ङः उकारो लुङिति इति विशेषणार्थः लृङः ऋकारः स्यतासी लृलुटोरिति विशेषणार्थं
ङकारो नित्यं ङितः इति विशेषणार्थं शपः पकारो न्तद्यान्नेः स्यपिताविति विशेषणार्थम् शानो नकी
र [illegible] त्यान्नित्यमिति विशेषणार्थम् सर्वेषां शकारस्तिङ्शित्सार्वधातुकमिति विशेषणार्थम्
आगमेषु टकारककारौ आद्यन्तौ टकिताविति विशेषणार्थम् मकारो मिदचोऽन्त्यात्पर इति

उं पा त्र

83

विशेषणं प्रत्ययेषु ङकारककारौ क्ङितिचेतिविशेषणार्थौ तत्रतिङ्शित्सार्वधातुक
मार्धधातुशेषः ॥ ततोसौ सार्वधातुकेविकरणाउच्यंते प्रथमंशः विकरणेषु भूवादिषु
धातुषु प्रथमभूतापरस्मैपदिकार्त्तकर्मकाः इत्येतस्माज्जातोः परस्य लकारस्य स्थानेति
ङ्विभक्तिर्यज्यते भूसत्तायामसातुः भूइत्ययंधातुःसत्तायामर्थेवर्त्तते भूइतिस्थितेनिरनु
नासिकात्वान्नकारस्येत्संज्ञानभवति भूवादयोधातवः भूयत्येवमादयः शब्दाः क्रियाव
चकाधातुसंज्ञाभवंतीतिसमुदायस्यधातुसंज्ञततोधात्वधिकारविहितानेकप्रत्ययं
प्रसंगेमतिवक्तुर्विवक्षाएविकाशब्दप्रवृत्तिनिमित्तविवक्षावशात् ॥ प्रत्ययः ॥ अधि
कारोयम् ॥ आपंचमाध्यायपरिसमाप्तेः यानितऊर्ध्वमनुक्रमिष्यामः प्रत्ययसंज्ञास्ते
वेदितव्याः प्रकृत्युपाधेरुपाधिविकारागमवर्जयित्वा ॥ परश्च ॥ परश्चभवतिधातो
र्वाप्रातिपदिकात्वायःप्रत्ययसंज्ञाः ऊः धातोरधिकारोयम् यदितऊर्ध्वमनुक्रमिष्यामः
आतृतीयाध्यायपरिसमाप्तेः धातोरित्येवंतद्वेदितव्यम् धातोरित्यनुवर्त्तमानोवर्त्तमा
नेलट्आरभ्योपरिसमाप्तेश्चवर्त्तमानाकालः तस्मिन्वर्त्तमानेर्थेवर्त्तमानाद्धातोर्लट्
प्रत्ययोभवति अकारस्येत्संज्ञालोपः प्रयोजनंटित आत्मनेपदानांटेरेइतिविशेष
णम् लकारस्यलशक्वतद्धितेइतिइत्संज्ञायांसा ॥ लस्येतिस्थानेनचनसंज्ञायामात्र

ऊं त्र

भवति एवमुत्तरत्र लिङादिषु नवसु लकारेषु द्रष्टव्यम् ॥ लस्य ॥ अधिकारोयं यदित
ऊर्ध्वमनुक्रमिष्यामः लस्येति तद्वेदितव्यं किं विदितं लस्येति दशलकार अनुबंधविशि
ष्टा विहिता अर्थविशेषे कालविशेषे च तेषां विशेषकाराननुबंधानुत्सृज्य यत्सामान्य
लिति तद्गृह्यते प्रकारस्तूच्चारणार्थः लस्य स्थाने वर्तमाने तिप् तस् झि सिप् थ
स् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् लमिति धीरे
य आदेशा भवंतीति सर्वे भूतिवादि भ्य गणपठितेभ्यो धातोः परस्मैपदित्वात् शेषा
त्कर्त्तरि परस्मैपदम् उपयन्यास्त्वः शेषः येभ्यो धातुभ्यो येन शेषाणामात्मनेपदमुक्तं
ततो योन्यः स शेषः येभ्य आत्मनेपदं न विहितं तेभ्यः परस्य लकारस्य कर्तरि परस्मैप
दं भवति शेषादेव नान्यस्मात् किं च परस्मैपदं लः परस्मैपदं लादेशाः परस्मैपदसंज्ञ
या भवंति एवमपि सर्वेभ्य परस्मैपदेभ्य आत्मनेभ्य ॥ तत्रापि तिङ् त्रीणि प्रथममध्यमोत्त
मा तिङ् अष्टादश प्रत्ययाः नव परस्मैपदसंज्ञकाः नवात्मनेपदसंज्ञकाः तदानवात्म
नेपदमिति वचनात् तिङ् त्रीणि त्रीणि प्रथममध्यमोत्तमसंज्ञा भवंति इति प्रथमत्रिक
स्य प्रथमपुरुषसंज्ञा मध्यमत्रिकस्य मध्यमपुरुषसंज्ञा उत्तमत्रिकस्य उत्तमपुरुषसं
ज्ञा एवमात्मनेपदस्यापि ज्ञेयं ॥ शेषे प्रथमः ॥ शेष इति मध्यमोत्तमाविषयादन्य

टुं॰
पा॰
८५
84

उच्यते यत्र युष्मदस्मदी समानाधिकरणे न स्तः तत्र शेषे प्रथमपुरुषो भवति तत्रापि ता
न्येकवचनद्विवचनबहुवचनान्येकशः तानि तिङः त्रीणि त्रीणि वचनान्येकशः ए
कवचनद्विवचनबहुवचनसंज्ञानि भवंति इति तिबिति प्रथमैकवचनम् तसिति
द्वितीयं द्विवचनं झीति तृतीयं बहुवचनम् एवमन्यत्रापि इत्येकवचनद्विवचनब
हुवचनसंज्ञायां ॥ द्व्येकयोः ॥ द्विवचनैकवचने ॥ द्विहेकयोः ॥ द्विवचनैकव
चने भवतः एतदपि सामान्यविहितयोः द्विवचनैकवचनयोरभिधानमित्येकत्व
विवक्षायां परस्मैपदे प्रथमपुरुषैकवचने तिप् पकारस्य लोपः प्रयोजनं अनुदात्तौ सु
प्पितावित्यनुदात्तत्वम् तिङ्शित्सार्वधातुकं तिङः शितश्च प्रत्ययाः सार्वधातुक
संज्ञा भवंति इति सार्वधातुकसंज्ञायां सार्वधातुके यगिति वर्तमाने ॥ कर्तरि शप्
कर्तृवाचिनि सार्वधातुके प्रत्यये परतः धातोः शप्प्रत्ययो भवति शकारस्य लोपः प्रयो
जनं पूर्ववत् यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गमित्यंगसंज्ञायां ॥ अंगस्य मिदेर्गु
मित्यधिकृत्य ॥ सार्वधातुकार्धधातुकयोः ॥ सार्वधातुके आर्धधातुके च परतः इ
गंतस्यांगस्य गुणो भवति भवति इत्यर्थविवक्षायां परस्मैपदे प्रथमपुरुषद्विवचनम् तस्
सकारस्योपदेशे ऽजनुनासिक इत् इत्यधिकृत्य हलन्त्यमितीत्संज्ञायां प्राप्तायां न विभक्तौ

ॐ

ने॰

तस्मादिति प्रतिषिध्यते रुचिरुक्तं परमित्यधिकृति परस्य मसस्त्रषोत्तः खरवसान
योर्विसर्जनीयः भवतः बह्वर्थविवक्षायां परस्मैपदे प्रथमपुरुषबहुवचनं भवतीति
फि आघ्नेयीनीयिघफढखछघां प्रत्ययादीनामित्यधिकृत्य ॥ झोन्तः ॥ प्रत्ययाः
वयवस्य चकारस्य वुह इतीमं संज्ञायां आम्नायां झोन्त इति सूत्रारंभा त्व भवति अत इति
अकारस्तकारपरित्राणार्थः अतो गुणे इति पररूपत्वम् भवति मध्यमपुरुषविवक्षा
यां युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः समानाभिधेये युष्मद्युपपदे
सति व्यवहिते वाव्यवहिते च स्थानिनि प्रयुज्यमाने प्रयुज्यमानेपि मध्यमः पुरुषो
भवति त्वं भवसि युवां भवथः यूयं भवथ उत्तमपुरुषविवक्षायां ॥ अस्मद्युत्तमः समा
नाभिधेयेस्मद्युपपदे सति व्यवहिते वाव्यवहिते च स्थानिन्यपि ॥ प्रयुज्यमाने
अप्रयुज्यमानेपि उत्तमपुरुषो भवति ॥ तस्यस्य मः सार्वधातुकेत्यनुवर्तमाने
अतो दीर्घो यञि अकारान्तस्यांगस्य यञादौ सार्वधातुके परतः दीर्घो भवति अहं भ
वामि आवां भावावः वयं भावामः अप्रयुज्यमानेपि अस्मदि भवामि भावावः भवा
मः अनुदात्तङितः आत्मनेपदमित्यनुवर्तमाने विपराभ्यां जेः ॥ विपराभ्यां
जयतेर्धातोरात्मनेपदं भवति ॥ टित आत्मनेपदानां टेरे ॥ टितो लकारस्यात्म

ऊं
पा
८५
85

नेपदानि तेषां ऐकारादेशो भवति विजयते सार्वधातुकमपित् ॥ सार्वधातुकं य
दपित् तद् ङिद्वद्भवतीति ङिद्वद्भावात् अतेर्येय इत्यनुवर्तमाने ॥ आतो ङितः ॥ आ
कारस्य ङिदवयवस्य अकारान्तात् परस्य इय् इत्ययमादेशो भवति अकारोच्चार
णं लोपपरित्राणार्थः लोपो व्योर्वलीति यलोपः आद्गुणः इति गुणः विजयेते वि
जयन्ते ॥ थासस्से ॥ थासः से इत्ययमादेशो भवति विजयसे विजयेथे विजयध्वे
विजये विजयावहे विजयामहे एवं पराजयते पराजयन्ते इत्यादि ॥ ष्मिङ् ईषद्धसने
धात्वादेः षः सः ॥ धातोरादिषकारस्य स्थाने सकारादेशो भवतीति षस्य सः आदेश
प्रत्यययोरिति षत्वव्यवस्थापनार्थः षादयो धातवः केचिदुपदिष्टाः केचनान्ये
तथापत्वेन अयवालत्वं क्रियते ॥ अजन्त्यपराः षादयः षोपदेशाः ॥ स्मि ॥ स्मि
टिस्वदिस्वञ्जिस्वपयश्च स्मृपि सृजिस्पृशस्तृन्नेसेकवर्जम् विषवः अनुदात्तङित आ
त्मनेपदं अनुदात्तेतो ये धातवः ङितश्च तेभ्यः आत्मनेपदम् भवति नान्येभ्यः विस्म
यते विस्मयेते विस्मयन्ते त्रिज्ञसेवा यामश्रयति ॥ स्वरितञितः कर्त्रभिप्राये क्रिया
फले ॥ स्वरितेतो ये धातवो ञितश्च तेभ्यः आत्मनेपदं भवति कर्तारं चेत् क्रियाफलम
भिप्रैति क्रियायाः फलं प्रधानभूतं ॥ यदर्थमसौ क्रियामारभते उक्त्वा तत्त्वकारवा

ॐ

ष्यस्य भवतीति त्वर्थः श्ययते इङ् ओ श्वि गतिवृद्ध्योः श्वयति इकारांताः ॥ डीङ् विहायसि
गतौ नत्पूर्वः डङ् डयते णीञ् प्रापणे णो नः धातोरादेः णकारस्य नकारादेशः इति
णस्य नः ॥ उपसर्गादसमासेपि णोपदेशस्य इत्यस्य णत्वविधेर्व्यवस्थार्थं णोपदेशाः धा
तवः केचिदुपदिश्यंते केचन न तथा पाठ्यन्ते अथवा लक्षणं क्रियते सर्व्वे णादयो णो
पदेशाः ष्णातिनन्दिनर्दिनाटिनाथवर्जं नयति नयते नयंति नयति प्रणे
वेः उपसर्गादसमासेपि णोपदेशस्य ॥ णउपदेशो यस्यासौ णोपदेशः णोपदेशस्य धातो
र्णो नकारस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारादेशो भवति समासेपि असमासेपि प्रणा
यति इति ईकारांताः ॥ शुश्रु गतौ शवति श्रवति द्रु गतौ द्रवति श्रवति श्रु श्रवणे श्र
वति षुङ् च्युङ् ज्युङ् प्रुङ् प्लुङ् स्नुङ् गतौ षवते च्यवते ज्यवते प्रवते प्लवते इत्या
दि उकारांताः ॥ भू सत्तायामेव धातुः भवति पूङ् पवने पवते पूङ् बधने सवते ऊ
कारांताः ॥ स्मृ चिंतायामेव णः स्मरत्वं स्मरति हृञ् हरणे हरति कर्त्रभिप्राये क्रिया
फले हरते ऋकारांताः ॥ व्हेञ् वनवरणयोः ऊवति साकारांताः धेट् पाने धयति वेञ् त
न्तुसन्ताने वयति कर्त्रभिप्राये क्रियाफले वयते ह्वेञ् स्पर्धायां ह्वयति ह्वयते निसमुप
विभ्यो ह्वः निसम् उपवि इत्येवं पूर्वात् ह्वयते धातोरात्मनेपदं भवति निह्वयते संह्वय

रू॰
पा॰
७५
86

ते उपह्वयते विह्वयते स्पर्धायां विषये आत्सर्यात ह्वयते धातोरात्मनेपदं भवति मल्लो
मल्लमाह्वयते ण्कारान्ताः ॥ ग्लैहर्षक्षयते ग्लायति म्लैगात्रविनामे म्लायति ध्यैचिन्तायां
ध्यायति कैगैशब्दे कायति गायति ष्टैवेष्टने स्त्यैष्ट्यायति ऐकारान्ताः ओकारान्तादिवा
विष्येव ओकारान्तानसंभवंत्येव ॥ अथ हलन्ता अकारोपधाः डुपचष्पाके ॥ पचतः
पचते यज देवतापूजासंगतिकरणदानेषु यजति यजते भज सेवायाम् भजति भ
जते शप आक्रोशे शपति शपते डुवपबीजसन्ताने वपति वपते उभयतोभाषाः त्यज
हानौ त्यजति फलनिष्पत्तौ फलति वमउद्गिरणे वमति क्षमसहने क्षमति दह भस्मीकर
णे दहति षल ज्वलप ज्वलनेषु षलति ज्वलति पतति रभराभस्ये आरभते डुलभष् प्राप्तौ
लभते हद पुरीषोत्सर्गे हदते अकारोपधाः ॥ डुयाच्ञ्याच्ञायाम् याचते गाहूवि
हने स्नाहूते स्नातौ शाव स्नारते आकारोपधाः सिह सेचने उगान्तरूपस्य उगान्तस्या
गस्यलघूपरस्य चगुणो भवति सार्वधातुकार्धधातुकयोः परतः सेहते चित संचेत
ने चेतति कित निवासे केतति इकारोपधाः ॥ जीवप्राणधारणे जीवति मील
न समाधौ मीलति मीलनि मीलने मीलति संमीलति क्रीडृविहारे क्रीडति क्रीडो नु
संपरिभ्यश्च ॥ अनुसंपरिभ्यो क्रीड आत्मनेपदं भवति अनुक्रीडते संक्रीड

ओं॰

नेपरिक्रीडते आङेङतं ईकारोपधाः अथोकारोपधाः ॥ गुहूसंवरणे गुहंगंतल
घूपदस्यचेति गुणः ऊदुपधायाःगोहः गुहोमवधायाऊकारादेशोभवति उपगूः
हते उपगूहति गजिप्रव्यक्तेशब्दे ॥ इदितोनंधातोः इदितोधातोः नुमागमो
भवति गंजति ष्ठिवुक्लमाचमांशिति ष्ठिवुनिरसने क्लमुग्लानौगवप्रचने आ
ङ्पूर्वः इत्येतेषांदीर्घोभवति शितिपरतः ष्ठीवति धात्वादेष्षःसः इतिसत्वे प्राप्ते
नप्राप्त ष्ठिवुष्वक्कीनांप्रतिषेधो वक्तव्य इतिसत्वंनभवति क्लामति चामति गण्ड
प्रत्ययः आचामति चमेराङ्युपसर्गस्यग्रहणमिहमाभूत् चमति विचमति क्रमप
रस्मैपरेषु ॥ क्रमपदविक्षेपे इदित्वादुपरस्मैपरेषु शितिपरतः दीर्घोभवति क्रा
मति अनुपसर्गाद्वा ॥ अनुपसर्गान्निमित्ताक्रामतेधातोरात्मनेपदंवाभवति क्र
मते क्रामति अपसर्गादितिकिं संक्रामति आङुद्गमने आङ्युपसर्गात्क्रमतेरुद्ग
मनेऽर्थेवर्तमानादात्मनेपदंभवति भानुराक्रमते व्योम चंद्र आक्रमते दिवम् ।
आक्रमते च ज्योतिषि ज्योतिरुद्गमन वक्तव्यं इहमाभूत आक्रामति धूमोहर्म्यतलम्
उपपराभ्यामसमर्थाभ्यां उत्पत्तेनताभ्यामसमर्थाभ्यांपरस्मात्क्रमतेरात्मनेपदंभवति
तौचेत्तत्रोपसमर्थौ तन्यार्थौभवतः नरःप्रक्रमते भोक्तुं उपक्रमते भोक्तुं समर्थो॰

रू॰
पा॰
८०
87

म्यामितिविकरणे दीर्घः प्रक्रामतिगच्छतीत्यर्थः अपरेद्युरपक्रामतिगच्छतीत्यर्थः
इषुगमियमांछः ॥ इषुइच्छायांगम्लृगतौयमउपरमेइत्येतेषांशितिपरतः छत्वं
भवति इच्छतिगच्छतियच्छति पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदांपिबजि
घ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ पादीनांपिबादय आदेशाभवन्ति
शितिपरतः पिबतिजिघ्रतिधमतितिष्ठतिमनतियच्छतिपश्यतिऋच्छतिधावति
शदेश्शितः ॥ शद्लृशातनेइत्यस्माच्छिद्भाविनः आत्मनेपदंभवतियतेसदेश्शतेः
सदेःसकारस्यउपसर्गान्निमित्तात्परतोऽनन्तरस्यमूर्धन्यादेशोभवतिनिषीदति
विषीदतिइहनभवतिप्रसीदति ॥ दंशसञ्जस्वञ्जांशपि दंशदंशनेसञ्जसं
ङ्गे स्वञ्जपरिष्वङ्गेइत्येतेषामनुनासिकलोपोभवतिशपिपरतः दशतिसजति
उपसर्गात्सुनोतीतिषत्वम्परिष्वजति ॥ रञ्जरागेइत्यस्यरञ्जेश्चात्यनुनासिक
लोपः भवतिरजति ॥ गुपूधूपविच्छिपणिपनिभ्यआयः गुपूरक्षणेधूपसन्तापे
विच्छगतौपणव्यवहारेस्तुतौच पनच इत्येतेभ्यआयप्रत्ययोभवति आयादय
आर्धधातुकेवा ॥ सार्वधातुकार्धधातुकयोर्गुणः इगन्तलघूपधस्यगुणः
गोपायतिधूपायतिविच्छायतिपणायतिपनायतेस्तुत्यर्थेनपनिनासाहचर्या

ऊ॰

नत्यर्थः पणिः प्रत्ययस्तत्परस्यति तेनाद्यप्रत्ययान्तादात्मनेपदं न भवति पणिपनीर्दि
त्मनेपदिनौ ऋतेरीयङ् ऋतिः सौत्रो धातुर्घृणायां वर्त्तते तत ईयङ्प्रत्ययो भवति
ङकार आत्मनेपदार्थः गुणप्रतिषेधार्थश्च ऋतीयते ॥ कमेर्णिङ् कमेर्धातोर्णि
ङ्प्रत्ययो भवति णकारो वृद्ध्यर्थः ङकारः आत्मनेपदार्थः अचोञ्णितीत्यधिकृत्य
अत उपधाया इति वृद्धिः सनाद्यन्ता धातवः सनाद्यः प्रत्यया अन्ते येषान्ते सनाद
यः सन्नन्ताद्या धातुसंज्ञा भवन्तीति शप् गुणः वा उवान्तो कामयते ॥ धीणपदृङौ
अनुदात्तङित आत्मनेपदम् अनुदात्तेतो धातवः ङितश्च तेभ्य एवात्मनेपदं भवति ङि
त आत्मनेपदानां टेरे टितो लकारस्य यान्यात्मनेपदानि तेषां टेरेकारादेशो भव
ति ॥ पद्यते ॥ सार्वधातुकमपित् सार्वधातुके यदपित् तत् ङिन्न भवति आतो
ये इति वर्त्तमाने आतो ङितः ॥ अकारान्तादङ्गादुत्तरस्य ङिदवयवस्य आकारस्य
इयादेशो भवति आद्गुणः लोपो व्योर्वलि ॥ धातोर्धातोश्च यकारवकारयोर्लो
पो भवति वलि परतः पद्येते पद्यन्ते ॥ थासस्से टितो लकारस्य थासः से आदेशो
भवति पद्यसे पद्येथे पद्यध्वे अतो गुणे पद्ये पद्यावहे पद्यामहे उपदेशे पोवाद्गाह
स्यात्सिञ्ज्विङ्डवड्दृतीमन्ताङ्गाहू ङितः क्रिरीति विशेषणार्थः एवंवत् लङादेप

रू॰ पा॰ ८८

वतिपचतः पचन्तिपचसि पचथः पचथ पचामिपचावः पचामः स्वरितञितः क
र्त्रभिप्राये क्रियाफले ॥ स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति कर्त्तारं
चेत्क्रियाफलमभिप्रैति पचते पचेते पचंते पचसे पचेथे पचध्वे पचे पचावहे पचामहे
इति ॥ तेभ्य एव धातुभ्यो [illegible] इत्यपि कृत्य ॥ अनद्यतने लङ् अतीतायाश्च रात्रेः
पश्चिमो यामः स कालो दिवसः आगामिन्याश्च रात्रेः पूर्वो यामः एषोऽद्यतन इत्य
भिधीयते अविद्यमानाद्यतने भूते ऽर्थे वर्त्तमानाद्धातोर्लङ् प्रत्ययो भवति ॥ लुङ्
लङ् लृङ्क्ष्वडुदात्तः ॥ लुङ् लङ् लृङ् इत्येतेषु परतः अडागमो भवति स
चोधातश्च भवति इतश्च लोपः परस्मैपदेषु इत्यनुवर्त्तमाने नित्यं ङितः
ङित्लकारसंबंधिनः परस्मैपदस्य इकारस्य नित्यं लोपो भवति शप् उणाश्च अभव
त् ॥ तस्थ ॥ स्थमिपां तांतंतामः ङित्लकारसंबंधिनां तामादीनां चतुर्णां यथा
संख्यं तामादय आदेशा भवंति अभवतां संयोगान्तस्य लोपः संयोगान्तस्य पदस्य लोपो
भवति अभवन् अभवः अभवतम् अभवत अभवम् नित्यं ङितः अनुवर्त्य सउत्तः
मस्य ङित्लकारसंबंधिन उत्तमपुरुषस्य नित्यं मकारस्य लोपो भवति अभवाव अ
भवाम आडजादीनाम् आडजादीनामंगानां लुङ् लङ् लृङ्क्षु परतः आडागमो भवति

उ॰

तिसचोधातस्यभवति आटश्च ॥ आटः अचिपरतः पूर्वपरयोःस्थानेवृद्धिरै
कारादेशोभवति पेचत पेचेतां पेचंत पेचथाः पेचेथाम् पेचध्वम् पेचे पेचावहि
पेचामहि अपचत् अपचताम् अपचन् अपचः अपचतम् अपचत अपचं
अपचाव अपचाम अपचत अपचेतां अपचंत अपचथाः अपचेथाम् अप
चध्वम् अपचे अपचावहि अपचामहि ॥ पंचमी ॥ विधिनिमन्त्रणामन्त्रणाधीष्ट
सम्प्रश्नप्रार्थनेषु लिङ् इत्यधिकृत्य ॥ लोट्च विध्यादिष्वर्थेषु लोट् प्रत्य
योभवति ॥ आशिषि लिङ्लोटौ ॥ आशीर्विशिष्टेर्थे वर्त्तमानाद्धातोर्लिङ्लोटौ
प्रत्ययौभवतः ॥ पचः ॥ लोडादेशानामिकारस्य उकारादेशोभवति भवतु ॥
तुह्योस्तात् आशिष्यन्यतरस्याम् ॥ तुहि इत्येतयोराशिषि विषयेतातङ् आदेशोभ
वति अन्यतरस्यां ङकारो गुणवृद्धिप्रतिषेधार्थः नातादेशार्थः भवताद्वा ॥ लोट
लङ्वत् ॥ लोटो लङ्वत्कार्यं भवति तामादयः सलोपश्च भवताम् भवंतु सेर्ह्यपि
च्च लडादेशस्य सेर्हि आदेशोभवति सच अपिच्च भवति अतो हेः अकारादुत्तर
स्य हेर्लुग्भवति भव भवतात् भवतम् भवत ॥ मेर्निः ॥ लोडादेशस्य मेः नि आ
देशोभवति अडुत्तमस्य पिच्च लोट्संबंधिन उत्तमपुरुषस्य आडागमोभ

रू॰
मा॰
८५
89

वतिसचोत्तमउत्तमः अपिद्भवति अकारस्य वर्णोऽपि स्यात्: भवानि भवाव भवाम ॥ १
आमेतः ॥ लोट्संबंधिन एकारस्य आमादेशो भवति टेरात्मनेपदानां टेरा पचतां
पचेतां पचंतां सवाभ्यां वामौ ॥ सकारवकाराभ्यां उत्तरस्य लोट्संबंधिन ए
कारस्य यथासंख्यं वा अं इत्येतावादेशौ भवतः ॥ पचस्व पचेथाम् पचध्वम् एतः
ऐ ॥ लोडुत्तमपुरुषसंबंधिन एकारस्य ऐकारादेशो भवति आमोऽपवादः वृद्धिः ॥
पचै पचावहै पचामहै ॥ पचतु पचतात् पचताम् पचंतु पच पचतात् पच
तम् पचत पचानि पचाव पचाम पचताम् पचेताम् पचंताम् पचस्व पचेथाम्
पचध्वम् पचै पचावहै पचामहै ॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्न
प्रार्थनेषु लिङ्सप्तमी ॥ विधिः प्रेषणम् निमंत्रणं नियोगकरणम् आमंत्रणं कार
णं अधीष्टः सत्कारपूर्वको व्यापारः संप्रश्नः संप्रधारणम् प्रार्थना याच्ञा ॥ विध्या
दिष्वर्थेषु धातोः लिङ्प्रत्ययो भवति ॥ यासुट्परस्मैपदेषूदात्तो ङिच्च परस्मैप
दविषयस्य लिङः यासुडागमो भवति स च धातोश्च ङिच्च भवति ॥ लिङः सलो
पोऽनंत्यस्य ॥ सार्वधातुकेषु लिङ् तस्यानंत्यस्य सकारलोपो भवति ॥ अतो या
यः ॥ अकारांतादंगात् परस्य या इत्येतस्य इय् इत्ययमादेशो भवति आद्गुणः ॥

ऊँ.

लोपोव्योर्वलीतियकारस्यलोपोभवति भवेत्भवेयाताम् झो ˉ म् लिङादेशस्यझो

ज्ञानादेशोभवति भवेयुः भवेः भवेतम् भवेतभवेयम्भवेवभवेम लिङः सीयट् ।

लिङादेशस्यझस्यरनादेशोभवति पचेरन्पचेथाः पचेयाथाम्पचेध्वम् इटोत् ॥

लिङादेशस्यइटः अदादेशोभवतिपचेयपचेवहि पचेमहिपचेत् पचेताम्पचेयु

पचेः पचेतम् पचेतपचेयम् पचेवम्पचेमपचेतपचेयाताम् पचेरन्पचेथाः ।

पचेयाथाम्पचेध्वम् पचेयपचेवहि पचेमहिइति ˉˉˉ टुनदि समृद्धौ आदित्वि

दुवदि इतीत्संज्ञा टुनाहुः ड्वितोथुःजितिविशेषणार्थः इदितंनुमस्तोः ॥ इदितो

धातोः नुमागमोभवतिनंदतिनंदतः नंदन्तीत्यादि ध्वंसुगतौनश्चापदान्तस्यझ

लीत्यनुस्वारः ध्वंसतध्वंसातेध्वंसंतइत्यादि व्येञ्संवरणेव्ययतिव्ययतः व्ययंते

ति व्ययसिव्ययथः व्ययथव्ययामिव्ययावः व्ययामः व्ययतेव्ययेतेव्ययंतेइत्यादि

अनद्यतनेलङ् अनंदत् अनंदताम् अनंदन् इत्यादिअध्वंसत अध्वंसेताम् ।

अध्वंसंतइत्यादिअव्ययत् अव्ययताम्अव्ययन् अव्ययतअव्ययेताम् अव्ययंत

इत्यादि लोट्च ॥ नंदतुनंदतात्त्वानंदताम् नंदतुनंद नंदतात्त्वानंदतम् नं

दतइत्यादि ध्वंसतांध्वंसन्ताम् इत्यादिव्ययतुव्ययतात्त्वाव्ययताम् व्ययंतुइत्या ।

दि धंसेत धंसेयातां धंसेरन् इत्यादि व्ययेत व्ययेयातां व्ययेरन् इत्यादि सर्वं
संभवाङ्गन्नयम् ॥ इति शः विकरणा भ्वादयः समाप्ताः ॥ अथ अदादय उच्यंते ॥
अद भक्षणे ॥ लुक् इति शप् तस्य अदादिभ्य इति भ्यः गणेभ्यः उत्तरस्य शपो लुक् भव-
ति अत्ति चेति च त्वं अत्ति अत्तः अदंति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः हन हिंसा
गत्योः हंति लोपः क्ङिति अनजिमां वं धातुकमपित् अपित् सार्वधातुकं तत् ङिद्वति
इति ङित्वात् अनुधातोपदेशवनतितनोत्यादीनाम् अनुनासिकलोपः फलि क्ङिति
अनुदात्तोपदेशानाम् अनिङां मंगानां वनोतेस्तनोत्यादीनां च अनुनासिकलोपो भ-
वति झलादौ क्ङिति प्रत्यये परतः हतः ॥ गमहनजनखनघसां इत्येतेषा-
मंगानाम् उपधाया लोपो भवति अजादौ प्रत्यये क्ङिति अनङि परतः ॥ हो हंतेर्ञ्ण-
िन्नेषु हंतेर्हकारस्य कवर्गादेशो भवति ञिति णिति प्रत्यये भवति ञिति णिति प्र-
त्यये परे नकारे च परतः घ्नंति हंसि हथः हथ हन्मि हन्वः हन्मः इत्यादि हंतेर[illegible]
तिप्रसंगात् ॥ वमोर्वा ॥ वकारमकारयोः परतः हंतेः उपसर्गस्थान्निमित्तादुत्तरस्य
णकारस्य णकारादेशो वा भवति प्रहण्मि प्रहन्मि प्रहण्वः प्रहन्वः प्रहण्मः प्रहन्मः
आङो यम हनः स्वमतत् परस्मै हन हिंसागत्योः आभ्यामाङ्पूर्वाभ्याम् अकर्मक क्रियाव-

वनाभ्यम्मात्मनेपदं भवति आहते आ आघ्नाते ॥ आत्मनेपदेष्वनतः ॥ आत्मनेप
देष्वयोजकारस्तस्यनकारान्तानांगाद्यन्नरम्या दित्यम आदेशो भवति आघ्नते आहसे आ
घ्नाथे आहहे अघ्ने आहन्वहे आहन्महे अकर्मकादित्येव आहंति वृषलं पादेन स्वा
गकर्मकाश्चेति वक्तव्यं आहते शिरः स्वमंगमस्वांगम् तेनेह न भवति आहंति शि
रः परकीयम् ॥ द्विष अप्रीतौ ॥ द्विषादिरिति द्विषत्वम् गुणः द्वेष्टि सार्वधातुकमपि
दिति ङित्वात् गुणप्रतिषेधात् द्विष्टः द्विषंति ॥ षढोः कस्से षकारढकारयोः ककारा
देशो भवति सकारे प्रत्यये परतः इणकोरिति वर्तमाने आदेशप्रत्यययोरिति षत्वं
गुणः द्वेक्षि द्विष्टः द्विष्ठ द्वेष्मि द्विष्वः द्विष्मः द्विष्टे द्विषाते द्विषते द्विक्षे द्विषाथे द्विड्ढे न
धस्य ढः झलां जशोन्ते इति जश्त्वं षस्य डः द्विड्ढ्वे द्विषे द्विष्वहे द्विष्महे ॥ दुह
प्रपूरणे ॥ पूर्ववदपित्त्ववचनेन कुत्वे अपवादो गुणः दादेर्धातोर्घः इति हस्य घः झषस्त
थोर्धोऽधः ॥ झषन्तस्योत्तथोः स्थाने धकारादेशो भवति अधः दधाति धातोर्वर्जयि
त्वा जश्त्वं चस्य घः दोग्धि इत्याः दुग्धः दुहंति ॥ एकाचो बशो भष् झषन्तस्य स्ध्वोः धातोरवयव
वस्य एकाचो झषन्तः बशः स्थाने भष् आदेशो भवति झलि सकारे धशब्दे च
परतः परान्तस्येति सम्बन्धः चत्वेन घस्य कः इकोरिति षत्वम् धोक्षि दुग्धः दुग्धे

सु॰
पा॰
५१
91

दुह्वः दुह्मः दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे दिह उपचये देग्धि
दिग्धः दिहन्ति धेक्षि दिग्धः दिग्ध देह्मि दिह्वः दिह्मः संदिग्धे संदिहाते इत्यादि नेर्गद
नदपतपदघुमास्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति।
देग्धिदेग्धिषु च इत्येतस्योपसर्गस्थान्निमित्तान्नेर्नकारस्य णकारादेशो भ
वति गदादिषु परतः प्रणिदेग्धि लिह आस्वादने लघूपधगुणः हो ढः
इति ढत्वं झषस्तथोर्धोऽध इति धत्वम् ष्टुत्वम् ढो ढे लोप इति ढलोपः लेढि ढ्रलोपे
पूर्वस्य दीर्घोऽणः इति दीर्घः लीढः लिहन्ति लेक्षि षढोः कः स लीढः लीढ लेह्मि
लिह्वः लिह्मः लीढे लिहाते लिहते लिक्षे लिहाथे लीढ्वे लिहे लिह्वहे लिह्महे च
क्षिङ् व्यक्तायां वाचि इकारः चक्षिङः ख्याञिति विशेषणार्थः स्कोः संयोगाद्योरं
ते च धातोरन्ते पदस्यान्ते च यः संयोगः झलि परतः तदाद्योः ककारसकारयोर्लो
पो भवति कलोपः ष्टुत्वम् आचष्टे आचक्षाते आचक्षते षढोः कः से इति कत्वम्।
इण्कोः इति षत्वम् आचक्षे आचक्षाथे कलोपः ष्टुत्वं जश्त्वादि झलां जश् झशि आ
चड्ढ्वे आचक्षे आचक्ष्वहे आचक्ष्महे॥ ईर गतौ सम्पूर्वः अचो रहाभ्या

डं॰

मिति द्विर्भावः समीर्ते समीराते समीरते समीर्षे इत्यादि ईढ स्तुतौ ष्टुत्ववर्त्या।

ध्वंएवंपरयोःस्वकारः ईढे ईड्डते ईडते ईड्वास्मे इत्यभवर्तमाने ॥ ईडजनोर्ध्वे च ॥
ईडजन इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य वा इडागमो भवति ईडिध्वे ईड्ध्वे ईडज-
नोर्ध्वे चेति इडागमः ईडिध्वे ईडे ईड्वहे ईड्महे ईश ऐश्वर्ये ब्रश्चभ्रस्जेति षत्वम् ष्टु-
त्वम् ईष्टे ईशाते ईशते ॥ ईशःसे ईशस्वरस्य से इत्येतस्य सार्वधातुकस्य इडागमो
भवति ईशिषे ईशाथे षत्वष्टुत्वजश्त्वानि ईड्ढे ईशे ईश्वहे ईश्महे आस उपवेश-
ने आस्ते आसाते आसते आस्से आसाथे ॥ धि च ॥ धकारादौ प्रत्यये परतः सका-
रस्य लोपो भवति आध्वे आसे आस्वहे आस्महे ॥ आङः शासु इच्छायां आशास्ते आशा-
साते आशासते आशास्से आशासाथे आशाध्वे जगत्वे नाथवा आशासे आ-
शासे आशास्वहे आशास्महे ॥ वस आच्छादने वस्ते वसाते वसते वस्से वसाथे व-
ध्वे वसे वस्वहे वस्महे कसि गतिशासनयोः इदितो नुं धातोः इदितो धातोः नुमाग-
मो भवति नश्चापदान्तस्य झलि इत्यनुस्वारः कंस्ते कंसाते कंसते कंस्से कंसाथे
... कंध्वे कंसे कंस्वहे कंस्महे णिसि चुम्बने णो नः इति णस्य
नः नमणामः कंस्महे निंस्ते निंसाते इत्यादि ॥ ... णिंसि निंस्ते ... निंसे निंस्वहे
निंस्महे इत्येतेषां नकारस्योपसर्गात् निमित्तात् ... णकारादेशो भवति प्रणिंस्ते

दे॰ पा॰ ५२

92

प्रणिंस्ते णिनिश्रुड़ो वोष्क्रारिति नत्वं नस्यगः चत्वंम नुमागमः निंक्ष्ते निंजते निंस्ते
निंक्ष्ते शिजि अव्यक्ते शब्दे नकारचत्वानुस्वारसवर्णाः शिंक्ते शिंजाते शिंजते इ-
त्यादि पृची संपर्के संपृक्ते ङित्त्वाद्गुणप्रतिषेधः संपृक्ते संपृचाते संपृचते इत्यादि षू-
ङ् प्राणिगर्भविमोचने शप् लुक् धात्वादेः षः सः सूते अचिश्नुधातुभ्रुवां य्वोरियङुवङ्।
सुवाते सुवते सूषे इत्यादि शीङ् स्वप्ने शप्लुक् ङित्त्वाद्गुणाभावः शीङः सार्व-
धातुके शीङोङ्गस्य गुणो भवति सार्वधातुके परे शेते शयाते आत्मनेपदेष्वनतः शी-
ङि इह आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गादुत्तरस्य अदादेशः स्यात् शीङो रु-
टो रुडागमो भवति शेरते इकारादेशप्रत्यययोरिति षत्वं शेषे शयाथे शेध्वे शये शेव
हे शेमहे इत्यादि इत्यात्मनेभाषः॥ यु अभिगमने यु मिश्रणामिश्रणयोः ...
नाते जने ष्णु प्रस्नवे ण्णु प्रस्नवेष्वधेयोः ऊर्णाहोरभ्यपि ... पिति सार्वधातुके इत्यप-
पिकृत्य॥ ततो वृद्धिर्लुकि हलि उकारान्तस्याङ्गस्य वृद्धिर्भवति लुकि सति पिति सा-
र्वधातुके हलादौ यौति युतः युवन्ति यौषि युथः युथ यौमि युवः युमः एवं यौति
रौति नौति स्नौति क्ष्णौति स्नाति कौति मौति परस्मैपदिनः ऊर्णुञ् आच्छादने ष्टुञ् स्तु-
तौः ब्रूञ् व्यक्तायां वाचि॥ ऊर्णोतेर्विभाषा॥ ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पि-

उ॰

तिसार्वधातुके प्रोर्णौति प्रोर्णोति प्रोर्णुतः प्रोर्णुवंति प्रोर्णोषि प्रोर्णौषि प्रोर्णुथः प्रोर्णुथ
प्रोर्णौमि प्रोर्णोमि प्रोर्णुवः प्रोर्णुमः प्रोर्णुते प्रोर्णुवाते प्रोर्णुवते इत्यादि स्तौति
स्तुतः स्तुवंति स्तुवे स्तुवाते स्तुवते अभि ष्टुवः उपसर्गान्सुनोति सुवति स्यति ९
स्योति स्तोभतिस्था सेनयसेधसिचसंजस्वंजाम् उपसर्गस्थान्निमित्तादुत्तरस्य सुनो
भ्यादीनां सकारस्य षत्वं प्यन्यादेशो भवति ष्टुत्वम् अभिषौति परिषौति ॥ ब्रुव ईट् ॥
ब्रुव उत्तरस्य हलादेः पित्सार्वधातुकस्यादिरीडागमो भवति गुणः ब्रवीति ॥ क्ङि
ति च ॥ क्ङिन्निमित्ते गुणवृद्धी प्रतिषिद्ध्येते न भवतः सर्वत्र ब्रूतः उवङादेशः ब्रु
वंति ब्रवीषि ब्रूथः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः ब्रूते ब्रुवाते ब्रुवते ब्रूषे ब्रुवाथे ब्रू
ध्वे ब्रुवे ब्रूवहे ब्रूमहे ॥ इण गतौ एति इतः ॥ इको यणचि ॥ इति यणि प्राप्ते इणो
यण् इकयणादेशो भवति अजादौ परतः यन्ति एषि इथः इथ एमि इवः इमः इङ्
अध्ययने नित्यमधिपूर्वः ङित्वाद्गुणाभावः अकः सवर्णे दीर्घः अधीते इयङादे
शः अधीयाते अधीयते अधीषे अधीयाथे अधीध्वे अधीये अधीवहे अधीमहे ॥ इ
क्स्मरणे अधिपूर्वः गुणः यणादेशः अध्येति अधीतः ॥ इणवदिकः ॥ इणव
दावायणादेशः अधियन्ति अध्येषि अधीथः अधीथ अध्येमि अधीवः अधीमः

१

हं॰ पा॰ ५२ 93

वीगतिप्रजनकांत्यसनखादनेषु वेति वीतः वियन्ति याप्रापणे याति यातः यांति
इत्यादि वागतिगंधनयोः वाति वातः वांतीत्यादि भादीप्तौ भाति भातः भांति स्नाशौ-
चे स्नाति श्रापाके श्राति द्राकुत्सितायांगतौ द्राथ प्राणिस्नवः नेर्गदनदेत्यादिना
मूर्धन्यः प्रणिद्राभिः प्रणिद्राति प्साभक्षणे प्साति पारक्षणे पाति रादाने राति लाआ-
दाने लाति दाप्लवने ख्याप्रथने प्रापूरणे मामाने दाति ख्याति प्राति माति मांता-
मांति विदज्ञाने परस्मैपदी ॥ णल । अतुस उस थल अथुस अ णल व म इत्यनुवर्त-
माने ॥ विदो लटो वा ॥ विदज्ञाने इत्यस्मात्परस्य लटः आदेशानां परस्मैपदसंज्ञ-
कानां णलादय आदेशा वा भवंति वेत्ति वित्तः विदंति वेत्सि वित्थः वित्थ वेद्मि विद्वः
विद्मः वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म ॥ [illegible] ॥ समो गम्यृच्छि-
प्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्यः गमि ऋच्छि प्रच्छि स्वरति अर्ति श्रु विदि दृशि
इत्येभ्यः सकर्मकेभ्यः आत्मनेपदं भवति संवित्ते संविदाते संविदते इत्यादि ब्रूञ्
पि ब्रुवः पंचानामादितः आहो ब्रुवः ब्रुवः परस्य लटः परानामादिष्टानां परस्मैपद-
संज्ञकानां पंचैव णलादयः णल अतुस उस थल अथुस इत्येते आदेशा भवंति
तस्मिन्नियोगेन च ब्रुवः आहः आहादेशो भवति आह आहतुः तस्य परत्वादिति ह्र-

उ॰

योः परस्मैपदत्वम् आजगलो गलीत्यपि ज्ञेयं ॥ आहस्थः ॥ आहो हकारस्य थका-
रादेशो भवति झलि परतः । खरि चेति चर्त्वम् आत्थ आहथुरित्यादि । अद भक्षणे ॥
इत्तेन यत्नेकाले लङ् लस्य तिपोस्य आदेशाः अड्गार्ग्यगालवयोरित्यपि ज्ञेयं
अदः सर्वेषां अदेरंगात् उत्तरस्य अपृक्तस्य सार्वधातुकस्य अडागमो भवति सर्वेषामा-
चार्याणां मतेन आदत् आत्ताम् आदन् आदः आत्ताम् आत्त आदम् आद्व आ-
म शीङ् स्वप्ने अशेत अशयातां अशेरत अशेथाः अशयाथां अशेध्वम् अशयि
अशेवहि अशेमहि ब्रूञ् व्यक्तायां वाचि अब्रवीत् अब्रूताम् अब्रुवन् अब्रवी:
अब्रूतम् अब्रूत अब्रवम् अब्रूव अब्रूम इति अथ पंचमी लोडादि विभक्तिः ॥ अत्तु
अत्तात् अत्ताम् अदंतु ॥ हुझल्भ्यो हेर्धिः ॥ हु इत्येतस्मात् झलंतेभ्यश्चोत्तरस्य
हेर्धि आदेशो भवति अद्धि अत्तात् अत्तम् अत्त अदानि अदाव अदाम शेताम्
शयातां शेरताम् शेष्व शयाथाम् शेध्वम् शयै शयावहै शयामहै इतःपर इत्येका-
रस्य ऐत्वम् ब्रवीतु ब्रूतात् ब्रूताम् ब्रुवंतु ब्रूहि ब्रूतात् ब्रूतम् ब्रूत ॥ रषाभ्यां
नो णः समानपदे अट्कुप्वाङ्नुम्व्यवायेपि ब्रवाणि ब्रवाव ब्रवाम ब्रूताम् ब्रुवातां ब्रुवता-
म् ब्रूष्व ब्रुवाथाम् ब्रूध्वम् ब्रवै ब्रवावहै ब्रवामहै इति प्रथमसप्तमीलिः

हं
पा॰
५४
९४

ह्विभक्तिः इतिलिङ्तस्यातिवास्यः श्रयात श्रयाताम् ॥ तस्यपासज्ञात श्रवणोप
सन्यात तस्यपरतः पूर्वपरयोपररूपमेकादेशोभवति श्रयुः श्रयाः तम श्रयातश्र
यो श्रयाव श्रयाम शयीत शयीयाताम् शयीरन् शयीथाम् शयीयाथाम् शयीध्वम् श
यीय शयीवहि शयीमहि ब्रूयात ब्रूयातां ब्रूयुः ब्रूयाः ब्रूयातं ब्रूयात ब्रूयां ब्रूयाव ब्रू
याम ब्रुवीत ब्रुवीयाताम् ब्रुवीरन् ब्रुवीथाः ब्रुवीयाथाम् ब्रुवीध्वम् ब्रुवीय ब्रुवी
ब्रुवीमहि ॥ इति ॥ श्रसतवि ॥ श्रस्ति श्नासोरल्लोपः ॥ श्नप्रत्ययस्यास्तेश्च ङ्क्ङिति
सार्वधातुकेपरे श्रकारलोपोभवति स्तः सन्ति ॥ तासस्त्योर्लोपः ॥ तासेरस्तेश्च स
कारस्य सकारादौ परे लोपोभवति श्रसि स्थः स्थ श्रस्मि स्वः स्मः व्यतिपूर्वः कर्तरि क
र्मव्यतिहारे कर्मणाहुः क्रियावाची व्यतिहारो विनिमयः तस्मिन् कर्मव्यतिहारे कर्म
णाहुः क्रियावाची व्यतिहारो विनिमयः तस्मिन् कर्मव्यतिहारे वर्तमानाद्धातोः श्रा
त्मनेपदं भवति व्यतिस्ते व्यतिसाते व्यतिसते ॥ सात्यस्याधोः ॥ सादित्येतस्य परस्य हेश्च सक
रस्य स्वबत्वादेशोभवति पतिह्नः पतिताम ध्रस्तेश्च हकारादेशोभवति परतः व्यतिहे
व्यतिस्वहे व्यतिःस्महे मृजषमृजशुद्धौ मृजेर्वृद्धिः मृजेरगस्य वृद्धिर्भवति सार्वधातुके
तिपिपरतः इतिवृद्धिः रषरत्वम् ब्रश्चभ्रस्जेति षत्वम् ष्टुत्वम् मार्ष्टि मृष्टः ॥ मृजेर्वि

उं॰

भाषा मृजेरणादौ विभाषा वृद्धिप्रतिषेधविषयः संक्रमः संक्रमे वृद्धिरिष्यत
इति वृद्धिः ॥ मृजति मार्जन्ति मार्ष्टि मृष्टः मृष्टमार्ष्टि मृजन्तः मृजन्तः ॥ वच
भाषणे ॥ चेः ऊरिति ज्ञात्वस्य वक्ति वक्तः वचन्ति इत्यादि किरिस्वप्सु विमोचने
जिष्वप शयने श्वस प्राणने अन च जक्ष भक्षहसनयोः ॥ आर्धधातुकस्येड्व
लादेरित्यधिकृत्य ॥ रुदादिभ्यः सार्वधातुके रुदादिभ्यः पंचभ्य उत्तरस्य वलादे
सार्वधातुकस्यादिरिडागमो भवति लकूपरगणः धोरिति रुदितः रुदिति रोदिषी
त्यादि स्वपिति स्वपितः स्वपन्ति श्वसिति श्वसितः श्वसन्ति प्राणिति प्राणितः प्राण
न्ति अनिति अनितत्वकारस्योपसर्गान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति जक्षि
ति जक्षितः जक्षादयः षट् जक्षइत्यादयः षट् धातवो अभ्यस्तसंज्ञा भवन्तीति अ
भ्यस्तत्वात् अभ्यस्तादिति झस्य अद् आदेशः जक्षति जक्षिषि जक्षिथः जक्षिथ जक्षि
मि जक्षिवः जक्षिमः ॥ जागृ निद्राक्षये पंचभ्य इति वचनात् इडन्तादितो
णः जागर्ति जागृतः एवं वक्ष्य अभ्यस्तादित्यदादेशः जाग्रति जागर्षि जागृथः जागृथ
जागर्मि जागृवः जागृमः ॥ दरिद्रा दुर्गतौ ॥ दरिद्राति ॥ इद्दरिद्रस्य दरिद्राइ
त्यस्य इकारादेशो भवति हलादौ सार्वधातुके क्ङिति दरिद्रितः श्नाभ्यस्तयोरातः

१२

ह्रे॰
पा॰
५५
95

श्नाऽऽदन्तस्याभ्यस्तसंज्ञकानां च आकारस्य लोपो भवति क्ङिति अजादौ परे दरिद्रति दरि-
द्राति दरिद्रथः दरिद्रथ दरिद्रामि दरिद्रिवः दरिद्रमः चकासीम् चकास्ति चका-
स्तः चकासति चकास्मि शासश्च अङ्शिशो शास्मि शासइदङ्हलो ॥ शासस्तपधाया
इकारादेशो भवति अङि हलादौ क्ङिति परे शासिवसिघसीनां चाशास्यादीना
मिकोकुत्तरस्य सकारस्य मूर्धन्यादेशो भवति शिष्टः शासति शास्सि शिष्ठः शिष्ठ-
थाः शिष्वः शिष्मः वश कान्तौ वष्टि उष्टः उशन्ति षत्वम् ष्टुत्वं च वष्टि ॥ ग्रहिज्या
वयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥ ग्रहादीनां धातूनां
ङिति प्रत्यये परतः किति च सम्प्रसारणं भवति संप्रसारणाच्च संप्रसारणादचि
परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति उष्टः उशन्ति वक्षि उष्ठः उष्ठ व-
श्मि उश्वः उश्मः ह्नुङ् अपनयने निह्नुवे निह्नुवाते निह्नुवते ॥ निह्नु-
षे इत्यादि ॥ इति लुग्विकरणा अदादयः समाप्ताः ॥ अथ जुहोत्यादय उच्य-
न्ते ॥ हु दानादनयोः कर्तरि शप् तथैव लङादयः ॥ जुहोत्यादिभ्यः श्लुः ॥ जुहो-
त्यादिभ्य उत्तरस्य शपः श्लुर्भवति एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्य लिटि धा-
तोरनभ्यासस्येत्यधिकृत्य ॥ श्लौ ॥ श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथम-

ॐ॰

स्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः अभ्याससंज्ञो भवति ॥ जुहोः श्लुः ॥ अ
भ्यासस्य कवर्गहकारयोः चवर्गादेशो भवति इति ह्रस्वः ॥ अभ्यासे चर्च ॥ अ
भ्यासे वर्तमानानां झलां चरो भवति चकारात् जशश्चेति जस्य जः पित्त्वगुणः जुहो
ति सार्वधातुकमपित् ङिदिति ङित्वात् क्ङिति चेति गुणः प्रतिषेधः जुहुतः उभे अभ्यस्तं ।
अस्मिन् प्रकरणे ये द्वे विहिते उभे अपि समुदिते ते अभ्यस्तसंज्ञे भवत इति अभ्यस्ताच्चा
त् अदभ्यस्तात् ॥ अभ्यस्तसंज्ञकादंगादुत्तरस्य झकारस्यात् इत्ययमादेशो भवति
इत्यदादेशः जुह्वति ॥ हुश्नुवोः सार्वधातुके ॥ हु इत्येतस्यांगस्य श्नुप्र
त्ययान्तस्य च अनेकाचो असंयोगपूर्वस्य यणादेशो सार्वधातुके परे यणादेशो भवतीति य
णादेशः जुह्वति षत्वम् जुहोषि जुहुथः जुहुथ जुहोमि जुहुवः जुहुमः ञिभी
भये श्लुः श्लौ इति द्विवचनम् ॥ ह्रस्वः ह्रस्वो भवत्यभ्यासस्य अभ्यासे चर्चेति
जश्त्वम् बिभेति इह इति इत्येतस्यांगस्याभ्यस्तस्य भी इत्येतस्य अन्यतरस्या
मिकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः बिभितः बिभीतः एरनेका
चो असंयोगपूर्वस्येति यणादेशः बिभ्यति बिभेषि बिभिथः बिभीथः बिभिथ बि
भीथ बिभेमि बिभिवः बिभीवः बिभिमः बिभीमः ह्रीलज्जायाम् द्विवचनम् ।

रू॰
पा॰
९९
96

कखभभस्थुल्तनच्छारि ॥ हलादिशेषः ॥ अभ्यासस्य हलादिः शिष्यते शुणः जिह्रे
ति जिह्रीतः इयङादेशोयणादेशः संयोगपूर्वस्येति निषेधान्नास्ति यत एवं भवति जिह्रि
यति जिह्रीषि जिह्रीथः जिह्रीथ जिह्रीमि जिह्रीवः जिह्रीमः डुदाञ् दाने ददाति
श्नाभ्यस्तयोरातः इत्यालोपः चर्त्वं ददतः ददति ददासि दत्थः दत्थ आङो नास्य
विहरणे कर्त्रभिप्रायार्थोयमारम्भः आङ्पूर्वो ददातेः अनास्याधिकरणे वर्त्तमानात्
धातोरात्मनेपदं भवति विद्यामाददते आददाते आददते आदत्से इत्यादि अनास्यवि
हरणे इति किम् अंस्यं व्याददाति आस्यसमानक्रियादपि प्रतिषेधो वक्तव्यः व्या
दिकां व्याददाति स्वाङ्गकर्मकाच्चेति वाच्यम् इह मा भूत् व्याददते पिपीलिकाः पतङ्गमु
खमिति डुधाञ् धारणपोषणयोः दधाति ॥ दधस्तथोश्च ॥ दध इति कृतद्विर्वचनो
दधातिर्निर्दिश्यते तस्य दधस्य धकारस्थाने भकारादेशो भवति तकारथकारयोः स्ध्वो
श्च परयोः चर्त्वम् धत्तः दधति दधासि धत्थः धत्थ दधे दधाते दधते धत्से
धत्से दधाथे धद्ध्वे दधे दध्वहे दध्महे णिजिर् शौचपोषणयोः विजिर् पृथग्भावे विष्ऌ
व्याप्तौ यमः श्लु द्विवचनम् निजां त्रयाणां गुणः श्लौ ॥ त्रयाणां निजादीनां गुणो भ
वति अभ्यासस्य श्लौ परे इत्यभ्यासस्य श्लौ परे इत्यभ्यासस्य गुणः ततः पित्त्वगुणः ने

ञ॰

त्वं वत्वं नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनेक्थ नेनेज्मि नेनि
ज्वः नेनिज्मः वेवेक्ति वेविक्तः वेविजति वेवेष्टि वेविष्टः वेविषति डुभृञ् धार
णपोषणयोः माङ् माने ओहाङ् गतौ ॥ उरत् ॥ ऋकारान्तस्याभ्यासस्य अकारा
देशो भवति इति अत्वम् रपरत्वम् हलादिशेषत्वम् अभ्यासे चर्चेति चत्वम्
भृञामित् ॥ भृञादीनां त्रयाणामभ्यासस्य इकारादेशो भवति इति इत्वम्
बिभर्ति बिभृतः बिभ्रति बिभर्षि बिभृथः बिभृथ बिभर्मि बिभृवः बिभृमः श्ना
भ्यस्तयोरातः इत्यपि ह्रस्व ॥ ई हल्यघोः ॥ श्ना इत्येतस्य अभ्यस्तानां च घुसंज्ञा
वर्जितानामाकारस्य ईकारादेशो भवति हलादौ क्ङिति सार्वधातुके परे मिमी
ते मिमाते मिमते जिहीते जिहाते जिहते ओहाक् त्यागे एवं वदेत्वम् जहाति ॥
जहातेश्च जहातेरिकारादेशो भवति अन्यतरस्याम् हलादौ क्ङिति सार्वधातुके
परे जहितः जहीतः जहति जहासि जहिथः जहीथः जहिथ जहीथ जहा
मि जहिव जहीवः जहिमः जहीमः ऋगतौ पृ पालनपूरणयोः श्लुः द्विर्वचनम् ॥ अर्
तिपिपर्त्योश्च अर्तिपिपर्ति इत्येतयोरभ्यासस्य इकारादेशो भवति श्लौ परत्वं
हलादिशेषः अभ्यासस्यासवर्णे ॥ अभ्यासस्य वर्णो वर्णान्तस्य असवर्णे विपरतः

इयङ् उवङ् इत्येतावादेशौ भवतः इत्तीयङ्धातोरेणः रपरत्वम् इयंति क्ङितिचे
तिउणप्रतिषेधः इयतुः इयति ऋ ह्रेमित्यधिकृति गेदवादेशः इकोयणचीति उ
णः इयर्षिइयृथः इयृयइयर्मि इयृवः इयृमः पृपालनपूरणयोः पिपर्ति नरो
ऌपएवेम्य ओष्ठः एवौघम्मा उकारान्म ओष्ठएवः नदंतस्यसतोरंगस्य उकारा
देशोभवति रपरत्वम् हलादिशेषावे धातुके क्ङितिपरतः वोरुपधाया दीर्घ इति दीर्घः ।
पिपूर्तः पिप्रति पिपर्षि पिप्रथः पिप्रथ ॥ पिपर्मिमस्यान्निमित्ताउत्तरस्यणोपदे
शस्य धातोः नकारस्य णकारादेशो भवति मा माने अस्मामाने पिपारिणात् परिणा
हिताहापरिणाह्यते परिणाह्येते आत्मनेपदे परिणाह्यताम् परिणाह्येताम् परिणा
ह्यतामित्यादि उभयपदी लिङ् दीव्येत दीव्येताम् दीव्युः नह्येत नह्येताम् नह्युः
आत्मनेपदे अन्व्ह्येते अन्व्ह्येयाताम् अन्व्हेरन् इत्यादि उभयपदी रंजेरागे ङित्वात् ।
अनिदितां हल उपधाया इति अनुनासिकलोपः रज्यति रज्यते शप आक्रोशे शप्यति
शप्यते पद गतौ पद्यते अपद्यते विपद्यते संपद्यते विद सत्तायां विद्यते बुध अवगमने
बुध्यते बुधमनहारेयधेन नृरुधकामअनुरुध्यते मन ज्ञाने मन्यते युज समा
धौ युज्यते सृज विसर्गे सृज्यते लि अल्पीभावे लिश्यते अनुधातोः अनुधातेतः ।

रधोकर्मकादृश्यावेवसकर्मकात् रधेः श्यन्प्रत्ययोभवति रधो हिंसायां
रध्यति अन्यत्र रध्नोति व्यध ताडने ॥ ग्रहिज्यावयिव्यधिवष्टि विचतिवृश्च
तिपृच्छतिभृज्जतीनां ङिति च ॥ ग्रहादीनां धातूनां ङिति प्रत्यये परतः शाका
राकिति च संप्रसारणं भवति संप्रसारणाच्चेति परपूर्वत्वम् विध्यति पुष्य पु
ष्टौ पुष्यति शुष शोषे शुष्यति तुष प्रीतौ तुष्यति दुष वैकृते दुष्यति श्लिष आ
लिंगने श्लिष्यति शक विभाषा तो मर्षणे वर्त्तते अन्यत्र शक्तः शक्नोति स्विद गा
त्रप्रस्रवणे स्विद्यते क्रुध कोपे क्रुध्यति क्षुध बुभुक्षायां क्षुध्यति शुध शौचे शु
ध्यति तृप प्रीतौ तृप्यति दृप हर्षमोहनयो दृप्यति षिध संराद्धौ सिध्यति राध
हिंसा राध्नोः राध्यति णश अदर्शने नश्यति मुह वैचित्ये मुह्यति द्रुह जिघांसा
याम् द्रुह्यति ष्णुह उद्गिरणे स्नुह्यति स्नुह्यति ष्णिह प्रीतौ स्निह्यति शमु तमु शा
मेत्त सर्वं कान्तो रम उपशमे शमामष्टानां दीर्घ श्यनि शमादीनामष्टानां दीर्घो
भवति श्यनि परे शाम्यति ताम्यति श्राम्यति भ्राम्यति क्षाम्यति क्लामति माद्यति
असु क्षेपणे अस्यति उपसर्गादस्यत्यूह्योर्वा वचनमित्यात्मनेपदे विकल्पेन
पर्यस्यति पर्यस्यते यसु प्रयत्ने यस्यो अनुपसर्गात् यसोऽनुपसर्गाद्वा श्यन्प्रत्ययो भव

रू॰
पा॰
५८

98

त्निपत्नेऽस्य यसति यस्यति दसु चलने दसु उपक्षये च दस्यति वसु स्तंभने व
स्यति पुस विभागे पुस्यति व्युष दाहे व्युष्यति विस प्रेरणे विस्यति उस हृषणे
उस्यति वुस उपसर्गे वुस्यति मसी परिणामे मस्यति लुट विलोडने लुट्यति स
मवेडने मस्यति नच म प्रज्ञायते तमस्यति भृशु भ्रंशु अधःपतने भृश्यति भ्रंश
दन्त्यामित्यनुनासिकलोपः भ्रश्यति वृश वरणे वृश्यति कृश तनूकरणे कृश्यति
ञितृषा पिपासायां तृष्यति हृष तुष्टौ हृष्यति रुष रोषे रुष्यति डिप क्षेपणे डि
प्यति कुप क्रोधे गुप व्याकुलत्वे युप रुप लुप विमोहने लुभ गार्द्ध्ये क्षुभ संचल
ने णभ तुभ हिंसायां क्लिदू आर्द्रीभावे कुप्यति गुप्यति युप्यति रुप्यति लुप्यति लु
भ्यति क्षुभ्यति नभ्यति तुभ्यति क्लिद्यति ञिमिदा स्नेहने ॥ मिदेर्गुणः
मिदेर्गस्य गुणो भवति श्यनि परे मेद्यति ञिक्ष्विदा स्नेहनमोचनयोः क्ष्विद्यति
ऋधु वृद्धौ गृधु अभिकांक्षायां ऋध्यति गृध्यति दिवादयः श्यन्विकरणाः समाप्ताः ॥
अन्तर्गणाश्चावस्वादयः षीङ् पर्यन्ताः ओदितः स्वादयो वृत्पर्यन्ताः इति ताश्च
लाः षूङीङो अनुचलने अस्यानवस्थाने हयो येह्णाम ला ग्लानौ क्रमुपर ॐ
विलेपे असीत इजने उच्छ्वसने लषकान्तो वा ज्ञाम लाशति वा यन ज्ञाम

तेत्रशाते स्नायते त्रास्यति भ्रामति क्रामति क्रमः परस्मैपदेष्विति दीर्घत्वम् क्ला
म्यति क्लामति ष्ठिवुक्लम्वाचमां ष्ठिवीतिदीर्घत्वम् त्रस्यति त्रसति त्रुट्यति त्रुट:
श्यन भावे त्वलादिभ्यश्च: लष्यति लषति अथ स्वादय उच्यन्ते षुञ् अभिषवे
सर्वं वलडारस्य: ष्णिप्राये ॥ स्वादिभ्यः श्नुः ॥ षुञ् अभिषवे इत्येवमादिभ्यो
धातुभ्यो श्नुप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परतः सार्वधातुकमपि
दिति ङिद्वाद्गुणाभावः पित्तुविकरणस्य सार्वधातुकार्धधातुकयो:
गुणः सुनोति सुनुतः उश्नुवोः सार्वधातुके यणादेशः सुन्वन्ति सुनोषि सुनुथः
सुनुथ सुनोमि सुनुश्च प्रत्ययः संयोगपूर्वो वा विति प्रसक्तस्य लोपश्चान्यतरस्यां
म्वोः ॥ योयमुकारः असंयोगपूर्वः तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो भवति
मकारवकारादौ प्रत्यये परे सुन्वः सुनुवः सुम्मः सुनुमः सुनुते सुन्वाते सुन्व-
ते मिञ् क्षेपे इत्यादि मिञ् बंधने मिनोति मिनुतः मिन्वंति मिनुते मिन्वाते मि-
न्वते चिञ् चये चिनोति चिनुतः चिन्वंति चिनुते चिन्वाते चिन्वते इत्यादि उ-
भयपदे लङ् असुनोत् असुनुताम् असुन्वन् असुनोः असुनुतम् असुनुत
असुनवम् असुनव असुन्व असुनुम असुनम ॥ परस्मै ॥ आप्लृ व्याप्तौ

ऋं॰ पा॰ ५५ 99

व्याश्नुवत व्याश्नुथाः व्याश्नुवाथाम् व्याश्नुध्वम् व्याश्नुवि व्याश्नुवहि व्याश्नुमहि
प्रचिनोतु प्रचिनुताम् प्रचिन्वन् प्रचिनोः प्रचिनुतम् प्रचिनुत प्रचिनवं
प्रचिन्व प्रचिनुव प्रचिन्म प्रचिनुम प्रचिनुत प्रचिन्वातां प्रचिनुथाः प्रचिन्वाथा :
प्रचिनुध्वं प्रचिन्वि प्रचिन्वहि प्रचिनुवहि प्रचिन्महि प्रचिनुमहि प्रभिषवेः ।
उपसर्गात् सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्जां
उपसर्गस्थान्निमित्तादुत्तरस्य सुनोत्यादीनां सकारस्य मूर्धन्यादेशो भवतीति ष
कारः प्रभिषुनोतु प्रभिषुणुतात् प्रभिषुणुताम् प्रभिष्ववेतु ननस्य णत्वा:
यारसंयोग एवात् धातुसकारः प्रसंयोगादेवं: तदन्तात्प्रत्ययाद्वस्य हेर्लभ
वति प्रभिषुणु प्रभिषुणुतात् प्रभिषुणुताम् प्रभिषुणुतात् प्रभिषुणवानि
प्रभिषुणवाव प्रभिषुणवाम परस्मै व्यश्नुतां व्यश्नुवाताम् व्यश्नुव व्यश्नुवा
थाम् व्यश्नुध्वं व्यश्नुवै व्यश्नुवावहै व्यश्नुवामहै आत्मनेनिम एवं: स्तोः श्चुना
श्चुरिति षत्वम् निः शान्ते निः श्नुनतात् निष्ठिवतुनाम् निष्ठिवनेतु निष्ठिवनि
ष्ठिवनतात् निष्ठिवनतम् निष्ठिवतु निष्ठिवनवा निष्ठिविनिष्ठि निष्ठिवनावनि ऊ.
ष्ठिवन वामपरस्मै अथात्मनेपदं निष्ठिवनतम् निष्ठिवन्ताम् निष्ठिवंताम् निः

निश्चिनुष्व निश्चिन्वाथाम् निश्चिनुध्वम् निश्चिनवै निश्चिनवावहै निश्चिनवा
महै उभयपदे लिङ् सुनुयात् सुनुयाताम् सुनुयुः सुनुयाद् इत्यादि परस्मै
अश्नुवीत अश्नुवीयाताम् अश्नुवीरन् एवमश्नुवीयाद् इत्यादि अश्नुवि आत्मने
नश्चिनुयात् निश्चिनुयाताम् निश्चिनुयुः एवं निश्चिन्वीत निश्चिन्वीयाताम्।
निश्चिन्वीरन्नित्यादि उभयपदी लिंग स्तृञ् आच्छादने स्तृणोति स्तृणुते स्तृणो
ति स्तृणुते धूञ् कम्पने धुनोति धुनुते धुनाति विभाषतः दुङ् उपतापे दुनो॰
ति हिगतौ हिनुमीरेडूति णत्वम् प्रहिणोति प्री प्रीतौ प्रीणोति स्पृ प्रीतिपाल
नयोः स्पृणोति आप्लृ व्याप्तौ आप्नोति अप्नुवः आप्नोति शक्लृ शक्तौ शक्नोति
असंयोगपूर्वस्येति निषेधाद्यणभावः नवङस्तेभ्यः आप्नुवन्ति शक्नुतः श
क्नुवन्ति ष्टुञ् आवरणे ष्टवास्य चेति स्नुः स्नुभावस्य स्पृणोति स्पृणुतः स्पृणुवं॰
ति समो गंमृच्छि एष्वेतेभ्य आत्मनेपदं संस्पृणुते संस्पृणुवते संस्पृणुते राध साध
संसिद्धौ राध्नोति साध्नोति अशू व्याप्तौ अश्नुते अश्नुवाते अश्नुवाते अश्नुवते
ष्टिघ अवस्कन्दने ष्टिघ्नुते तिक तिग च तिक्नोति तिग्नोति षिघ प्रागल्भ्ये
धृष्णोति दम्भु दम्भे अनिदितामित्यनुनासिकलोपः दभ्नोति दधृष्णोति

श्नुविकरणाः स्वादयः समाप्ताः ॥ अत व्याप्तौ भ्वादिः अतोन्यतरस्याम् अ
तः अन्यतरस्यां अ भवति अतोति अवति ततत्वरुत्सतत्वकारणं इति भ्वादि
तत्वकारणे ततो विकल्पेनश्नुः ततोंतिततति ॥ अथ तुदादयउच्यंते ॥ १
तुदादिभ्यः शः एवं वृह्लादयः तुद व्यथने इत्येवमादिभ्यो धातुभ्यः अप्रत्ययो
भवति शपोपवादः ङित्वाद्गुणाभावः तुदति तुदतः तुदंति एवं तुदसोन्यादि ।
नुद प्रेरणे नुदति नुदते दिश अतिसर्जने उपदिशति उपदिशते भ्रस्ज पाके ग्र
हिज्यादि संप्रसारणं गलोजपशीतिसलोपः श्चुत्वं स्वजः भृज्जति भृज्जते वि
पयेरणो क्षिपति क्षिपते स्वरितेतः विभाषिताः जुषी प्रीतिसेवनयोः जुषति ओ
विजी भयचलनयोः विजते ओलस्जी व्रीडे लज्जते अन्तरालातः ओव्रश्चू छेदने
वहसंभवे ग्रहिज्यादिसंप्रसारणम् वृश्चति विचति तव्वितज्वेशादितोनुधाः
तो रिति नुमागमः तम्चति मिव्वतङ्क्तो शेमिश्चति तिव्वसवरणे विचति ऋव
स्वनेति तृकातत्त्मगेत्त्वभावि मोहनेबहुवा ऊनोहिंसाना नावेशि चतिन ऊति त्व
भवति ऋह्वति त्तृपतृत्पत्तृसौतृपति अनिचितामितम्गुनासिकलोपः शत्
न्यादीनां वक्ष्यमाणमिति तृप्म तृम्पति दृभ दृम्फति लोगेगुफ्गुन्फ ग्रन्थने उम

नर्भे पूरणे उभ उम्भ शुभ शुम्भ शोभार्थे हृफति हृम्फति शुफति शुम्फति नभति नम्भति ।
शुभति शुम्भति दृभी ग्रन्थे दृभति विध विधाने विधति नृत गवने नृतति ।
षुण प्रेरणे षुणति मृण हिंसायाम् मृणति तुण कौटिल्ये तुणति पुण कर्मणि
शुभे च पुणति मुण प्रतिज्ञाने मुणति कुण शब्दोपकरणयोः कुणति शुन ग
तौ शुनति द्रुण हिंसागतिकौटिल्येषु द्रुणति घुण घूर्ण भ्रमणे घुणति घूर्णति
षुर ऐश्वर्ये सुरति कुर शब्दे कुरति क्षुर विलेखने क्षुरति खुरति ख
रं विछने खुरति घुर भीमार्थशब्दयोः घुरति पुर अग्रगमने पुरति इषु इच्छा
यां इषुगमियमां छ इति छत्वं तुक इच्छति मिष स्पर्धायाम् मिषति चिल वि
लसने चिलति विल संवरणे विलति किल श्वैत्यक्रीडनयोः इलति मिल श्ले
षणे मिलति मिलति तिल स्नेहने तिलति लिख अक्षरविन्यासे लिखति
कुट कौटिल्ये कुटति पुट संश्लेषणे पुटति कुच संकोचने कुचति छुर छेद
ने छुरति स्फुट विकसने स्फुटति त्रुट छेदने त्रुटति तुट कलहकर्मणि तुट
ति जुड संवरणे जुडति जुड बन्धने जुडति नट संश्लेषणे नटति लुटति कृड घ
नत्वे कृडति कुड बाल्ये कुडति घुड प्रतिघाते घुडति तुड तोडने तुडति थु

हे॰
पा॰
१२
101

इभुडसंवरणे भुडति भुडति स्फुरस्फुरणे स्फुरति स्फलस्फुलचलने स्फलति
स्फुलति परस्मैपदिनः गतेत्तृयमे प्रवरते प्रत्ययान्तेन नवङ्नसनो भवति
पूविघ्ननेभवति पथपथगतौ गत्यर्गे पथति भ्रमतिमुख्येयंयोः अभवति उङ्शब्दे उ
वते ह्वृङ्प्राणत्यागे ह्वृङ्व्यायामे ॥ म्रियतेर्लुङ्लिङोश्च ॥ म्रियतेर्धातोर्लु
ङ्लिङोर्विषयात् शिङाधि नस्यात्मनेपदं भवति अन्यत्र न भवति इयङ्गूडीङ् अ
न्तरन्त्यापि प्राप्य विङ्मयत्लिङ्च अकारान्तस्यागमस्य विङ् इयमादेशो भव
ति गाथगितिस्यतयोः लिङियकारागमे सर्वधातुके परे म्रियते म्रियते अपगतो
अपति पूर्वपाणत्यागे म्रियते ति निवासगत्योः क्षियति परस्मैभवति उपसर्गा
त्सुनोति स्वपति स्यति स्यति स्तौति स्तोभति स्यान्नयस्य धसेधस च सञ्ज स्वञ्जाम् ।
उपसर्गस्यान्निमित्ताउत्तरस्य सुनोत्यादीनां सकारस्य मूर्धन्यादेशो भवति अ
भिषुवति परिषुवति त्ववितेपे गृणिगरणे ॥ जात इर्द्धातोः ॥ ऋकारान्तस्या
गस्य धातोः इकारादेशो भवति रपरत्वं च किरति गिरति ॥ अवाद्गः ॥ अवपू
र्वाद्गिरतेरात्मनेपदं भवति अवगिरते कृपेरोलः ॥ योयङि इति च वर्तमाने
अचिविभाषा ॥ गृसगो प्रत्यये परः गिरतेर्विभाषा लकारादेशो भवति गिर

डो॰

निगिलति ॥ समः प्रतिज्ञाने ॥ संपूर्वोद्गिरतेः प्रतिज्ञानेर्थे वर्त्तमानादात्मनेपदं
भवति प्रतिज्ञा पणमभ्युपगमः प्रतिश्रवः अंगीकरणमिति यावत् शतं संगिरते नि
त्यं शब्दं संगिरते परस्मैपदिनः धृङ् आदरे आद्रियते धृङ् अनवस्थाने आद्रियते।
प्रच्छ ज्ञीप्सायां पृच्छति आङि नुप्रच्छ्योरिति विवक्षायामात्मनेपदं आपृच्छते गु
जविसर्गे सृज अभि सृजति सृजोऽस्त्रौ फलं जभ शीति जभ्रमस्वरः प्रभुत्वेन रुस्वथाः
सृजति रुजो भंगे रुजति भुज कौटिल्ये भुजति कपस्थ शंकापति स्पृश ग्रासे स्पृशे स्पृ
शति विश प्रवेशने विशति नेर्विश इत्यात्मनेपदं भवति निविशते उशल्लमाते।
णो ॥ शेमुचादीनां ॥ शेअत्यये परस्मै चादीनामंगानां नुमागमो भवति न स्वा
पदात्तस्य फलं त्वनुस्वारः अनुस्वारस्य ययि परसवर्णः मुंचति मुंचतः मुंचति प
वं मुंचावहे मुंचते इत्यादि उभयपदी लङ् अतुदत् अतुदताम् अतुदन् इत्या।
दि परस्मै मृङ् प्राणत्यागे अम्रियत अम्रियेतां अम्रियंतामित्यादि अमुंचत अ
मुंचताम् अमुंचन् एवं मुंचावहि उभयपदे लोट् तुदतु तुदतात् तुदताम् तु
दन्त्वित्यादि म्रियताम् म्रियेताम् म्रियंताम् इत्यादि मुंचतु मुंचतात् मुंचता
मुंचाहि इत्यादि उभयपदे लिङ् तुदेत् तुदेतां तुदेयुः इत्यादि परस्मै म्रियेत।

रु॰
पा॰
१०२
102

म्रियेताम् म्रियेरन् इत्यादि आत्मने चेत संचेताम् संचेयुः एवं संचेतं॰
चेमहि लस्तुडेस्तने लंपति लंपते विद्लृ लाभे विंदति विंदते लिप उपदेहे लिं॰
पति लिंपते षिचिर् क्षरणे सिंचति सिंचते कृतेङ्छेदने कृंतति खिद परितापे॰
खिंदति पिश अवयवे पिंशति अंतर्गणः कुडादयो यावत् कुङ् शब्दे इति तु॰
दादयो वृत्यर्यंताः ॥ इति श विकरणास्तुदादयः समाप्ताः ॥ अथ रुधादय॰
उच्यंते ॥ रुधिर् आवरणे एयवत् लडादयः शपि प्राप्ते रुधादिभ्यः श्नम् ॥ रु॰
धिर् आवरणे इत्येवमादिभ्यो धातुभ्यः श्नम् प्रत्ययो भवति झषस्तथोर्धोधः ॥ झ॰
ष उत्तरयोस्तकारथकारयोर्धकारादेशो भवति दधातिं वर्जयित्वा ॥ इति धत्वम् ॥॰
झलां जश् झशि इति जश्त्वम् अट्कुप्वाङ्नुम् इति णत्वम् रुणद्धि ॥ श्नसोरल्लोपः ॥॰
श्नस्य अस्तेश्च अकारस्य लोपो भवति सार्वधातुके क्ङिति च परतः इत्यकारलोपः
अनुस्वार परसवर्णौ ॥ ययोपरसवर्णः ॥ हल उत्तरस्य झलः सवर्णे च परतः
लोपो भवत्यन्यतरस्यां एवं न्यामिडम इति णत्वाभावः रुंधः रुंधंति रुणत्सि रुंत्थो बा॰
ध इति झलां जश् झलां जश् झशि इति जश्त्वम् तस्य चर्त्वम् रुणत्सि रुंधः रुंध रु॰
णध्मि रुंध्वः रुंध्मः रुंधे रुंधाते रुंधते रुंत्से रुंधाथे रुंद्ध्वे रुंधे रुंध्वहे रुंध्महे॰

रु॰

भिदिर् विदारणे भिनत्ति भिन्तः भिंदंति भिनत्सि भित्थः भित्थ भिनद्मि भिंद्वः भि
द्मः भिंते भिंदाते भिंदते भिंत्से भिंदाथे भिंध्वे भिंदे भिंद्वहे
भिंद्महे छिदिर् द्वैधीकरणे छिनत्ति छिंतः छिंदंति छिंते छिंदाते छिंदते रिचि
र् विरेचने चाः नारिति नात्व रिणक्ति रिंक्तः रिंचंति रिंक्ते रिंचाते रिंचते विरिंक्ते विरिं
चाते विरिंचते विजिर् पृथग्भावे विनक्ति विंक्तः विंजंति विंक्ते विंजाते विंजते
क्षुदिर् संपेषणे क्षुणत्ति क्षुंतः क्षुंदंति क्षुंते क्षुंदाते क्षुंदते युजिर् योगे युन
क्ति युंक्तः युंजंति युंक्ते युंजाते युंजते प्रोपाभ्यां युजेरित्यात्मनेपदं प्रयुंक्ते उप
युंक्ते उछृदिर् दीप्तिदेवनयोः छृणत्ति छृंतः छृंदंति छृणत्सि छृंते छृंदाते छृंद
ते उतृदिर् हिंसानादरयोः तृणत्ति तृंतः तृंदंति तृंते तृंदाते तृंदते उभयतो
भाषाः कृती वेष्टने कृणत्ति कृंतः कृंतंति ञिइंधी दीप्तौ इंधे इंधाते इंधते विद
विचारणे विंत्ते विंदाते विंदते विंत्से विंदाते विंदते शिष्ळ विशेषणे
विंद्वः शिनष्टि शिंष्टः शिंषंति षढोः कः सि इति कः शिनक्षि शिंष्ठः
ष्ठः शिंष्ठ शिनष्मि शिंष्वः शिंष्मः पिष्ळ संचूर्णने पिनष्टि पिंष्टः पिं
षंति पिनक्षि भंजो आमर्दने चाः नारिति नात्वम् चर्त्वं श्नान्नलोपः भनक्ति

२०

रू॰
पो॰
१२
103

इमकारो दृश्यते ततस्तस्य नकारस्य लोपो भवति भनंक्ति भंक्तः भंजति भनक्ति
भभंक्तः भंक्त भुजपालनाभ्यवहारयोः ॥ भुजो नवने ऽग्रनवने ऽर्थे वर्त्तमानादात्मने
पदं भवति इत्यात्मनेपदं भवति इत्यात्मनेपदं चोक्तरिति ज्ञातव्यम् एवरिचेति चार्त्वम्
भुंक्ते भुंजाते भुंजते भुंक्षे भुंजाथे भुंग्ध्वे भुंजे भुंज्वहे भुंज्महे निहर्वेः ऽभयपदेष्विलङ्
न्यरुणत् न्यरुन्ध्याम् न्यरुंधाम् न्यरुन्धन् जश्त्वे कृते ॥ रुद्धापात्ताः धकारस्येति
पिपरतः वा रुन्भवति न्यरुणाः न्यरुणात् न्यरुंधाम् न्यरुंधन् न्यरुणाधिम् न्यरुन्ध्वं न्यरु
रुंधुपरस्मै प्रभुंक्त प्रभुंजताम् प्रभुंजत प्रभुंक्ताः प्रभुंजाथाम् प्रभुंग्ध्वम् प्रभुंजि
प्रभुंज्वहि प्रभुंज्महि प्रयुनक् प्रयुंक्ताम् प्रयुंजन् प्रयुनक् प्रयुंक्तम् प्रयुंक्त
प्रयुनजम् प्रयुंज्व प्रयुंज्म न्ययुंक्त न्ययुंजताम् न्ययुंजत न्ययुंक्ताम् न्ययुंजाथा
म् युंग्ध्वम् न्ययुंजि न्ययुंज्वहि न्ययुंज्महि ॥ उभयपदे लोङ्च रुणद्धु रुंधाद्वा रुंधां
रुंधन्तु रुन्ध्योर्हेर्धिः ॥ रुंधि रुंधाद्वा रुंधं रुंध रुंधानि रुणधाव रुणधाम परस्मै भुंक्तां
भुंजाताम् भुंजताम् भुंक्ष्व भुंजाथां भुंग्ध्वम् भुनजै भुनजावहै भुनजामहै युनक्तु यु
नक्ताद्वा युनक्तम् युंजन्तु युंग्धि युंक्ताद्वा युंक्तम् युक्त युन युनजानि युनजाव युन
जाम वियुंक्ताम् वियुंजताम् वियुंजताम् वियुंक्ष्व वियुंजाथाम् वियुंग्ध्वम् वियुन

श्री.

जे विधुनज्वावहे विधुनज्मामहे उभयपदेलिंगकंधातु रुंध्यतां रुंध्यः इत्यादिपरस्मै
आत्मने भुंजीत भुंजीयातां भुंजरन् इत्यादि ॥ भुंज्यात् भुंज्यातां भुंज्याः इत्यादि
अभिभुंजीत अभिभुंजीयाताम् अभिभुंजीरन् इत्यादिएवमभिभुंजीमहीति तृह
तृहि हिंसि हिंसायां तृणहइम् तृणन्न इत्यस्यागमस्य इम् इत्ययमादेशो भवति हः
लादौ पिति सार्वधातुके परतः होढ इति ढत्वम् ष्टुत्वम् ढोढलोपः आड्गुणः तृणे
ढि तृंढः तृंहंति तृहंति तृणेक्षि तृंढः तृढात् तृणेह्मि तृंह्वः तृंह्मः हिंसि हिंसायाम्
इदितो नुं धातोरिति नुम् श्नान्नलोप इति नलोपः हिनस्ति हिंस्तः हिंसंति हिनस्सि
हिंस्थः हिंस्थ हिनस्मि हिंस्वः हिंस्मः अंजू व्यक्ति म्रक्षणगतिषु अनक्ति अंक्तः अं
जंति अनक्षि तनच् संकोचने तनक्ति तंक्तः तंचंति वृजी वर्जने वृणक्ति वृंक्तः वृंजं
ति वृणक्षि पृची संपर्के पृणक्ति पृंक्तः पृंचंति पृणक्षि ॥ श्नंविकरणा रुधादयः
समाप्ताः ॥ अथ तनादय उविकरणा उच्यंते ॥ तनुविस्तारे एवंवल्लदादयः शी
विभाषे ॥ तनादिकृञ्भ्य उः ॥ तनुविस्तारे इत्येवमादिभ्यो धातुभ्यः कृञश्च उ प्रत्ययो
भवति कर्तृवाचिनि सार्वधातुके परतः पित्सु गुणः तनोति तनुतः तन्वंति अपाप
वादः आर्धधातुके शेषः तिङ्शित्स्त्रप्रत्ययः वर्जयित्वा अन्यः प्रत्ययः शिष्टः स

२१

रू॰ पा॰ २॰४ 104

आर्द्धधातुकसंज्ञा भवति सार्वधातुकार्द्धधातुकयोर्गुणः तनोषि तनुथः तनुथ
तनोमि तनवः तनुमः लोपश्चास्यान्यतरस्यां म्वोरिति पक्षे उकारलोपः तन्वः तन्मः
तन्वते तन्वाते तनुषे तन्वाथे तनुध्वे तन्वे तन्वहे तन्महे षणु दाने सनोति सनु
तः सन्वंति क्षणु हिंसायां क्षणोति क्षणुतः क्षण्वंति ऋणु गतौ अर्णोति ऋणुतः
ऋण्वंति तृणु अदने तर्णोति तृणुतः तृण्वंति घृणु दीप्तौ घर्णोति घृणुतः घृ
ण्वंति वनु याचने वनुते वन्वाते वन्वते मनु अवबोधने मनुते मन्वाते मन्व
ते मनुषे मन्वाथे मनुध्वे मन्वे मन्वहे मनुमहे मन्महे मनुमहे अतने डुकृञ्
करणे धातोर्गुणः तरपरतः इति परत्वम् ततो विकरणस्यापि गुणः ॥
अत उत्सार्वधातुके ॥ उकारप्रत्ययान्तस्य करोतेरकारस्य उकारादेशो भवति
सार्वधातुके क्ङिति परे करोति कुरुतः यणादेशः अचो रहाभ्यां द्वे न कुरुच्छुरा
म् रेफहकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च द्वे न भवतः कुर्वंति करोषि कुरु
थः कुरुथ करोमि ॥ नित्यं करोतेः ॥ करोतेर्नित्यमुकारस्य वकारमकारादौ
प्रत्यये ॥ परतः लोपो भवति कुर्वः कुर्मः कुरुते कुर्वाते कुर्वते कुरुषे कुर्वा
थे कुरुध्वे कुर्वे कुर्वहे कुर्महे ॥ अनुपराभ्यां कृञः कर्त्रभिप्राये गंधनादिषु

डं॰

च करोतेरात्मनेपदं विहितं तस्यापवादः अनुपराभ्यामित्येवं एवानुकरोतेः परस्मैपदं भ
वति अनुकरोति पराकरोति धिवि प्रीणनार्थः कृवि हिंसाकरणयोश्च इदितो नुं
धातोरित्यागमे कृते धिन्विकृण्व्योरच्च धिन्विकृण्व्योः धान्वोः उप्रत्ययो भवति अ
कारश्चान्तादेशः अतो लोपः इत्यकारलोपः तस्य स्थानिवत्त्वाद्धातोर्गुणाभावः
पित्त्वविकरणस्य गुणः धिनोति कृणोति उभयपदे लङि समतनोत् समतनुतां ।
समतन्वन् समतनोः समतनुतम् समतनुत समतनवम् समतन्व समतनु
व समतन्म समतनुत परस्मै अमनुत अमन्वाताम् अमन्वत अमनुथाः अमन्वा
थाम् अमनुध्वं अमन्वि अमन्वहि अमनुवहि अमन्महि अमनुमहि आत्मने ।
सं एवं सः सहसः एवं इत्यनुमाने संपर्युपेभ्यः करोतौ भूषणे संपरि उप इत्येभ्यो भू
षणार्थे करोतौ परतः संकात्सुडेवो भवति अनभ्यासव्यवायेपि अड्व्यवायेपि सं का
त्सुडेवो भवति समस्करोत् समस्कुरुताम् समस्कुर्वन् समस्करोः समस्कुरुतं
समस्कुरुत समस्करवम् समस्कुर्व समस्कुर्म समस्कुरुत समस्कुर्वाताम् समस्कु
र्वत समस्कुरुथाः समस्कुर्वाथाम् समस्कुरुध्वम् समस्कुर्वि समस्कुर्वहि समस्कु
र्महि उभयपदी लोट्च वितनोतु वितनुताद्वा वितनुताम् वितन्वन्तु वितनु वि

२२

तं॰
पा॰
१०५
105

तनुताद्वा वितनुताम् वितनुत वितनवानि वितनवाव वितनवाम परस्मै मनु॰
ताम्मन्वाताम् मन्वतम्मन्वष्वमन्वाथाम् मनुध्वम् मनवै मनवावहै मनवाम
हे आत्मने करोति कुरुताद्वा कुरुताम् कुर्वन्तु कुरुत तस्य प्रत्ययः दसंयोगाद्वा
दिति हिलोपः कुरुताद्वा कुरुतताम् कुरुत करवाणि करवाव करवाम कुरुताम्
कुर्वाताम् कुर्वताम् कुरुष्व कुर्वाथाम् कुरुध्वम् करवै करवामहै उभयपदे लिः
ङ्च तनुयात् तनुयाताम् तनुयुरित्यादि परस्मै मन्वीत मन्वीयाताम् मन्वी
रन् ॥ इत्यादि आत्मने ॥ ये च ॥ करोतेः ॥ यकारादौ प्रत्यये परतः नित्यमु
कारलोपो भवति कुर्यात् कुर्यातां कुर्युः तथा कुर्वीत कुर्वीयाताम् कुर्वीरन्
एवं कुर्वीमहि ॥ तनादयः समाप्ताः ॥ अथ क्र्यादयः आविकरणाः उच्यन्ते ॥
डुक्रीञ् द्रव्यविनिमये इह यवलडादयः श्नापि प्राप्ते ॥ क्र्यादिभ्यः श्ना ॥ डुकृञ्
इत्येवमादिभ्यः श्नाप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परतः श्नापोपवा॰
दः ङित्वाद्गुणाभावः क्रीणाति ई हल्यघोः ॥ श्नाइत्येतस्य अभ्यस्तानां च आका
रस्य ईकारादेशो भवति घुवर्जितानां हलि ङिति परतः श्नात्यस्तयोगात इत्य
कारलोपः क्रीणीतः क्रीणन्ति क्रीणासि क्रीणीथः क्रीणीथ क्रीणामि क्रीणीवः क्रीणीमः

ॐ

परिव्यवेभ्यः क्रियः ॥ परिविअवइत्येतेभ्यः परस्मात् क्रीणातेरात्मनेपदं भवति ।
परिक्रीणीते विक्रीणीते अवक्रीणीते परस्मैपदसंभवे वृणीते वृणाते वृणते
वृणीषे वृणाथे वृणीध्वे वृणे वृणीवहे वृणीमहे आत्मने ग्रह उपादाने ग्रहादीनां सं
प्रसारणं ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ग्रह उ
पादाने ज्या वयोहानौ वेञ् वये व्यध ताडने वश कान्तौ विच संभवे ओव्रश्चू छेदने
प्रच्छ ज्ञीप्सायाम् भ्रस्ज पाके इत्येतेषां धातूनां ङिति प्रत्यये परतः चकारात्किति
च संप्रसारणम् भवति संप्रसारणाच्च संप्रसारणादचि परतः पूर्वपरयोः स्थाने
पूर्वरूपमेकादेशो भवति सर्वत्र गृह्णाति गृह्णीतः गृह्णन्ति गृह्णासि गृह्णीथः गृह्णी
थ गृह्णामि गृह्णीवः गृह्णीमः गृह्णीते गृह्णाते गृह्णते गृह्णीषे गृह्णाथे गृह्णीध्वे गृ
ह्णे गृह्णीवहे गृह्णीमहे उभयपदेष्वङ् प्रक्रीणातु प्रक्रीणीताम् प्रक्री
णन्तु प्रक्रीणाः प्रक्रीणीताम् प्रक्रीणीत प्रक्रीणाम प्रक्रीणाव प्रक्रीणीमः
प्रवृणीत प्रवृणाताम् प्रवृणत प्रवृणीथाः प्रवृणाथाम् प्रवृणीध्वम् प्रवृणि
प्रवृणीवहि प्रवृणीमहि आत्मने प्रगृह्णात् प्रगृह्णीताम् प्रगृह्णन् प्रगृह्णाः प्र
गृह्णीतम् प्रगृह्णीत प्रगृह्णाम् प्रगृह्णीव प्रगृह्णीम प्रगृह्णीत प्रगृह्णाताम् प्रगृ

कृ॰
पा॰
१५
106

गृह्णत अगृह्णीथाः अगृह्णाथाम् अगृह्णीध्वम् अगृह्णि अगृह्णीवहि अगृह्णीम-
हि उभयपदे लोट् क्रीणातु क्रीणीताद् क्रीणीताम् क्रीणन्तु क्रीणीहि क्रीणी-
ताद् क्रीणीतम् क्रीणीत क्रीणानि क्रीणाव क्रीणाम परस्मै वृणीतां
वृणाताम् वृणताम् वृणीष्व वृणाथाम् वृणीध्वम् वृणै वृणावहै वृणामहै गृह्णा-
तु गृह्णीताद् गृह्णीताम् गृह्णन्तु ॥ हलः श्नः शानज्झौ ॥ हलउत्तरस्य श्न-
स्य शानजादेशो भवति हौ परतः अतोऽतो लेर्लुक् गृहाण गृह्णीताद्
गृह्णीतं गृह्णीत गृह्णानि गृह्णाव गृह्णाम परस्मै उभयपदे लिङ् वृणीयात् वृणी-
वः इत्यादि आत्मने वृणीत वृणीयाताम् वृणीरन् इत्यादि आत्मने गृह्णीयात्
गृह्णीयाताम् गृह्णीयुः एवं गृह्णीमहीत्यादि लिङ् मीञ् मीणाति मीणीतः
मीणन्ति मीञ् हिंसायां मीनाति हिनुमीनाः हिनुमीना इत्येतयोरुपसर्गस्थान्नि-
मित्तादुत्तरस्य नकारस्य णकारादेशो भवति प्रमीणाति पूञ् पवने प्वादीनां ह्रस्व
स्वः पूञ् एवमादीनां ह्रस्वो भवति शिति परतः पुनाति पुनीते लूञ् छेदने लुनाति
लुनीते स्तृञ् आच्छादने स्तृणाति स्तृणीते कॄञ् हिंसायां कृणाति कृणीते वृञ्
वरणे वृणाति वृणीते धूञ् कम्पने धुनाति धुनीते शॄ हिंसायां शृणाति शृणीते

ओ॰

पॄ पालनपूरणयोः पृणाति मॄ हिंसायां मृणाति दृणीते दॄ विदारणे दृणाति
जृणाति दॄ भये दृणाति नॄ नये नृणाति ॠ गतौ ॠणाति गॄ शब्दे गृणाति ज्या व-
योहानौ ग्रहिज्येति संप्रसारणं पूर्वत्वम् हलि दीर्घः प्वादीनां ह्रस्वः जिनाति री गतिरे-
षणयोः रिणाति ली श्लेषणे लीनाति व्री वरणे व्रीणाति व्री तरणे व्रीणाति क्षिष्
हिंसायां क्षिणाति ज्ञा अवबोधने ज्ञाजनोर्जा जानाति संप्रतिभ्यामनाध्या-
ने इत्यात्मनेपदं संजानीते प्रतिजानीते बंध बंधने अनिदितामित्यादिना नु-
लिवलोपः बध्नाति संयवि लोडने अनुनासिकलोपः मथ्नाति श्रंथ ग्रंथ संद-
ते ग्रथ्नाति कुंथ संक्लेशे कुथ्नाति मृद क्षोदे मृद्नाति गुध रोषे गुध्नाति कुष निष्क-
र्षे कुष्णाति उध्रस उञ्छे उध्रस्नाति मुष स्तेये मुष्णाति क्षुभ संचल-
ने क्षुभ्नाति णभ तुभ हिंसायां नभ्नाति क्लिशू विबाधने क्लिश्नाति अश भोजने अ-
श्नाति विस्नाति प्रुष प्लुष स्नेहनसेचनयोः प्रुष्णाति प्लुष्णाति ग्रह उपादाने ग्र-
हिज्येति संप्रसारणं गृह्णाति गृह्णीते उध्रस उञ्छे उध्रस्नाति मुषस्तेये मुष्णाति वृत्तविभाषि-
ता ॥ श्नाविकरणाः क्र्यादयः समाप्ताः ॥ सर्वेत्तर्वे स्कन्ने स्तुम्भस्यत्वाः अ-
थ ॥ अथाश्चत्वारः सौत्राः स्कम्भ स्तम्भ स्तुम्भ स्कुम्भ तेभ्यो धातुभ्यः श्नुप्रत्ययो भ

२४

चु॰ पा॰ १०७

107

वति स्तभ्नाति स्कभ्नोति स्कुभ्नाति स्कभ्नोति स्कुनाति स्कुनोति ॥१
अथ चुरादय उच्यंते ॥ चुर स्तेये सत्यापपाशरूप वीणातूलश्लोक सेना लोम
त्वच वर्म वर्ण चूर्ण चुरादिभ्यो णिच् सत्यापादिभ्यः चूर्णपर्यंतेभ्यः श्या दिभ्
श्च णिच् प्रत्ययो भवति चुगंतलघूपधस्य च चुगंतस्यांगस्य लघूपधस्य च सार्वे
धातुकयोः इको गुणो भवति सनाद्यंता धातवः सनादिप्रत्ययांताः शब्दा धातुसंज्ञा
भवंतीति धातुसंज्ञायां ततो लडादयः कर्तरि लडिति लट् तिप् शप् गुणः अया
देशः चोरयति चोरयतः चोरयंतीत्यादि परस्मै अन्यत्र णिचश्च णिजंतादात्मने
पदं भवति कर्त्रभिप्राये क्रियाफले चोरयते चोरयेते चोरयंते इत्यादि आत्मने॰
--- पल रक्षणे पालयति पालयतः पालयंति इत्यादि अर्च पूजायाम् अर्चय॰
तीत्यादि उभयपदी लङ् तथा अचोरयत् अपालयत् अर्चयदित्यादि तथा चोर
यतु अर्चयतु अर्चयतु लोट् तथा चोरयेत् अर्चयेत् अर्चयेतामित्यादि लङ्इदि
सर्वमन्नेयम् चिति स्मृत्याम् इदितो नुं धातोः चिंतयति यत्रि संकोचने यंत्र
यति लल तस्थो नांक्रनयोः ललयति ललेः स्वरितेः करणम् ज्ञापकम् अन्यत्र
चुरादिणिचः कर्त्रभिप्राये क्रियाफले णिचश्चेत्यात्मनेपदं भवति ललयते ल॰

डो॰

ड उपसेवायां क्रियाफले णिचश्चेत्यात्मनेपदं भवति लालयते लड उपसेवा-
यां जिह्वोन्मथनयोर्लडिरिति पिच्छम् अत उपधाया इति वृद्धिः मितां ह्रस्वः
लडयति त्वम्(?) स्नेहने मेदयति जल अपवारणे जालयति नट अवस्पन्दने नाट-
यति श्रथ प्रतिहर्षे श्राथयति नान्ये मितहेताविति नास्ति ह्रस्वो णिचि मित्त्वं बध
संयमने बाधयति पॄ पूरणे उवोऽसिंतीति वृद्धिः पारयति ऊर्ज बलप्राणनयोः
ऊर्जयति वर्ण प्रेरणे चूर्णयति पंथ प्रक्षेपणे पंथयति षंब संबंधने षंबयति शम्ब
संबंधने शम्बयति सम्ब संबंधने सयति भक्षयति कुट्ट छेदने कुट्टयति कुट्ट छे-
दनेन कुत्सनयोः कुट्टयति लुंठ स्तेये लुंठयति शठ श्वठ असंस्कारगत्योः शाठ-
यति श्वाठयति संह साम प्रयोगे साहयति स्निह स्नेहने स्नेहयति ...संवरणे
...यति आग्रहाने आणयति तड आघाते ताडयति खट्ट भेदने खोडयति खुड
खुडयति ऊडि रक्षायाम् ऊंडयति कडि खंडने कंडयति कुट्ट वमने कुट्टयति
कुत्स आसादनादरयोः कुत्सयति ... चुट संचोदने चोटयति तल
शौचकर्मणि तालयति तलति प्राकरणे तालयति पल रक्षणे पालयति मार
णातोषणनिशामनेषु ॥ कपि चलिः प्रतिज्ञो ...

दु॰
पा॰
१०८

108

अर्तिह्रीव्लीरीक्नूयीक्ष्मायी इत्येतेषामंगानामाकारांतानां च पुगागमो भवति
णौ परतः स्थितां कुरुवः मारणे ज्ञापयति मृगान्व्याधः विज्ञपयति गुरुं शिष्यः प्रज्ञा॰
पयति शास्त्रं तत्त्वः नान्ये मितो ऽहेतौ च चह संचलने चहयति रज रज्जायां रज॰
यति मृगविशेषणे रंजयति पचि विस्तरवचने प्रपंचयति तिज निशाने तेज॰
यति प्रत च्छेदने प्रतयति कृत संशब्दने ऋतइद्धातोः उपधायाः ऋकारस्य
इश्चो भवति रपरत्वम् पालि च उपधायां च धातोः ऋपधाहेतौ यौ रेफलकारौ तह॰
त्ययैतयोरुपधाया इको दीर्घो भवति कीर्तयति वर्ध छेदनपूरणयोः वर्धयति॰
हल्ल प्रेरणे पल्लयति पिडि संघाते पिंडयति चित संचेतने चेतयति इल प्रेरणे पल॰
यति पिडि संघाते पिंडयति चित संचेतने चेत इति तेच शाद्गमने रेचनयोः छापयति
तेतंत्र ऊर्द्ध्वधारणे तंत्रयति ते सातिउपभाषणे मंत्रयति ते भर्त्सन तर्जने भ॰
र्त्सयति ते वस्त गंध अर्दने वस्तयते गंधयते लल ईप्सायां श्रम लल्ला लोचने श्रा॰
मयते नान्ये मितः लालयते श्रामयते कृप छेदने त्रोडयते लक्ष आलोचने लक्ष॰
मापने आत्मपदार्थः पुनः पदः लक्षयते कुत्स अवक्षेपणे कुत्सयति ते वञ्चु

उं॰

प्रलंबने वंचयति रुधि वञ्च्योः प्रलंबने ॥ रुधिवञ्चि इत्येतयोरेतयोः प्र

लंबने वर्त्तमानयोः आत्मनेपदं भवति मानवर्कं वंचयते ---- स्तृणु मास्त्रि॰
प्रतिबंधे धर्मयतित्ति रिवुपरिकूजने आरेवयति वरविज्ञाने निकारयति
मस्तत्वामिशोधने पारयते विरचेतना व्याख्यान विचारे भ्रमांवेदयते वेदीत्य
र्थः आख्याने निवासं वेदयति आचष्ट इत्यर्थः विचारे वेदयते वारिमा मन
नभे विमानयते युज ऊन्मायोयोजयते ऊन्मनो वा ऊन्मयते आ ऊन्मासान्न
नेपदिनः रभ्योग्रध्ययने रचंयति भृत्यभाषणे वुक्कायति शाकृतमस्तगोसवि
ष्फरतो शाकृयति कणनिमीलने काणयति सूदआस्रवा सूदयति जमतान
ने जामयति पचबंधने पाशयति अमरोगे आमयति चट स्फुट भेदे चाटयति १
आस्फोटयति घट्टचलने घट्टयति घटादयो मितः रिवतर्जने रवयति शाकृत
शुषिरविशकृने अववोषयति प्रासः कान्तस्मा तन्त्र आक्रंदयति लशशिल्प
संयोगेल्लाशायति शिल्पयति भूष अलंकरणे भूषयति मोक्ष मोचने मोक्षयति
अर्हे प्रजायां अर्हयति ज्ञानियोजने पागमः आज्ञापयति स्पृध अभसत्हने मर्धयति
षह अभिभवे ध्यथयनं प्रसाहयति अभिभवतीत्यर्थः यतनिकारोपस्कारयो
यातयति वमस्वेदापहरणे शुवामयति भवोवल्कलने भावयति बाधविकल्प

हैं॰
पा॰
९५
109

ने व्रोपयति ह्रापे लाटर्योह्रापेरोल्लङ्गतिरेफस्य लः अवकल्पयति शुचश्रमोच
नेमोचइति चपश्रवधारणे पोषयति दल विधारणे दालयति अवपदगतो पा
दयति लड विलाडने लाडयति लजि लंजायति भजि भंजायति दशि दंशयति
कसि कंसयति लगि लंगयति त्रसि त्रासयति शूपगोपयति पूयपूपयति विछु
विछ्ययति बर्ह बर्हयति लोकृ आलोकयति लोचृ लोचयति नट नाटयति॰
ऊपकोपयति तर्क ऊहे तर्कयति वृत्त वर्तयति वृध वर्धयति रुद्र आप्यायने
आरुदयति रुजा हिंसायां रोजयति स्वद आस्वादने आस्वादयति स्वदेरकर्मका
त् आरुषाविन्वा ॥ वा णिव भवतीत्यपिक्रियते वृषु प्रसहने वर्षयति वर्षति॰
युज एची संपर्के संपर्चयति योजयति षह मर्षणे उत्सायति ई सेप ई स्थति लीङ्॰
वीकरणे लेलोनुग्ल का वन्यत स्याम् इति नुगागमः विलीनयति अन्यत्रति
त्वल्लीयते विस्मात बुक लोपयति वृजी वर्जने वर्जयति वृञ् आवरणे आवार॰
यति ज्ञरुष्वयोहानो जरयति रिच संपर्के रीचनयोः विरेचयति शिषप्रसर्वोप॰
योगे अवशेषयति विष्वीति मर्य विषयविशेषयति तप दाहे तापयति॰ ऊ॰
त्रपत्रप्रीतर्पयति श्रथक्रथहिंसायां श्राथयति क्राथयति सोऽङ्गतोमीम

यति शीक आमर्षणे शीकयति अर्त्त हिंसायाम् अर्त्तयति हिंसयति आङ्स
द्व पद्यत्यर्थे आसादयति वत्स मर्दे मने वात्सयति मान पूजायाम् मानयति
वच भाषणे वाचयति गर्ह विनिन्दने गर्हयति मार्ग अन्वेषणे मार्गयति कठि शो
के कंठयति मृजू शौचालंकारणयोः मार्जयति धृष प्रसहने धर्षयति आप्ह
षाद्वा अन्त्रयथायथ्यं विकरणा भवति पृची संपर्के रुधादित्वात् श्नम् पृणक्ति
ली श्लेषणे क्र्यादित्वात् आलीनाति वृञ् स्वादिः वृणोति जृष दिवादित्वात्
श्यन् जीर्यति विचि विश्लेषणे विविनक्ति विषू विशिनष्टि धूञ् कंपने स्वादि
नांद्रस्वः धुनोति प्रीञ् तर्पणे प्रीणाति श्रथ ग्रंथे श्रथ्नाति आपू आप्नोति वच

मार्गः

शः त्वकवार्धिभूवादिः मार्गति कठि शोषणे कंठयति भुज माश्रि भवतीत्यादि
इति चुरादिगणः गणः शबादिकार्यं पूर्ववत् अजयत् स्यस्य सिपांतानाम्
ङित्कारसंबंधिनां तामादीनां तन्तां तां मा स्य स्थाने आदेशो भवति यथा संख्ये
न अजयताम् संयोगांत लोपः अजयन् अजयः अजयताम् अजयतः अजयम्
स उत्तमपुरुषस्येत्यधिकृत्य ॥ नित्यं ङितः ॥ ङित्कारसंबंधिनः उत्तमपु
रुषसकारस्य नित्यं लोपो भवति अजयाव अजयाम अजयत विजयेताम् व्य

२३

रू॰
पा॰
११०
110

जयतव्यजयेथाव्यजयेथाम् व्यजयध्वम् व्यजयेव्यजयाव व्यजयामहि एवं सर्वं
वभूवादिगणोयोज्यम् अटः सर्वेषाम् ॥ अडोंगाङ्गस्यापदन्तस्यादन्तस्य प्रत्यय
स्यअडागमोभवति सर्वेषामाचार्याणांमतेन अटोपवादः आडजादीनाम् लुङ्
लङ् लृङ्ष्वपरतः अजादेरंगस्य आडागमोभवति ॥ आटश्च ॥ आटश्चाचिपर
तः पूर्वपरयोस्थानेवृद्धिरेकादेशोभवति आदत् आत्ताम् आदः आत्तम् आत्त
आदम् आद्व आद्म हनहिंसागत्योः हन्तिसिपोः हल्ङ्याबित्यस्यलोपः अनु
नासिकलोपः अहन् अहताम् उपधालोपः घत्वंचअघ्नन् अहन् अहतम् अ
हतअहनम् अहन्वअहन्म आत्मनेपदम् आहत आघ्नाताम् आघ्नत आहथाम् आ
घ्नाथाम् आहध्वम् इत्यादि द्विषअप्रीतौ अद्वेट् अद्विष्टाम् द्विषश्चेतिपाक्षिकोझेः
जुसादेशः अद्विषुः अद्विषन् अद्वेट् अद्विष्टम् अद्विष्ट अद्विषम् अद्विष्वअद्विष्म
अद्विष्ट अद्विषाताम् अद्विषत इत्यादि दुहप्रपूरणे अधोक् अदुग्धाम् अदुहन् अधोक् अ
दुग्धम् अदुग्ध अदोहम् अदुह्व अदुह्म दिहउपचये अधेक् अदिग्धम् अदिहन् ।
लिहआस्वादने अलेट् अलीढाम् अलिहन् चक्षिङ् व्यक्तायांवाचिव्याङ्पूर्वः च
स्यचत्वं व्याचष्ट व्याचक्षाताम् व्याचक्षत व्याचष्ठाः ईडस्तुतौ ऐड्ड ऐडाताम् ऐड

ॐ

ऐडत ऐडथाः ऐडाथाम् ईडजनोर्ध्वे चेति इट् ऐडिध्वम् ईश ऐश्वर्ये ऐष्ट व्रश्चभ्रस्जे
ति षत्वम् ऐशाताम् ऐशत ऐष्ठाः ऐशाथाम् ऐड्ढ्वम् आस उपवेशने आस्त आसा
ताम् आसत आङः शासु इच्छायाम् आशास्त आशासाताम् आशासत आशास्थाः
आशासाथाम् आशाध्वम् वस निवासे अवस्त अवसाताम् अवसत षूङ् प्राणि
प्रसवे असूत अचि श्नुधातुभ्रुवामित्युवङ् असुवाताम् असुवत शीङ् स्वप्ने अ
शेत अशयाताम् अशेरत शीङो रुट् यु मिश्रणे उतो वृद्धिर्लुकि हलि अयौत् अयु
ताम् अयुवन् ऊर्णुञ् आच्छादने और्णौत् और्णोत् और्णुताम् और्णुवन् ब्रूञ् व्य
क्तायां वाचि अब्रवीत् अब्रूताम् अब्रुवन् इण् गतौ ऐत् ऐताम् इणो यण् इति
यणादेशः असिद्धवदत्राभात् ॥ असिद्धवदित्यधिकारः यदित ऊर्ध्वमनुक्र
मिष्यामः आ अध्यायपरिसमाप्तेः तदसिद्धवद्भवतीत्येवं वेदितव्यम् आभादि
ति विषयनिर्देशः आ भसंशब्दनाद्युच्यते न तत्र कर्तव्ये अत्रेति समानाश्रय
त्वमसिद्धत्वस्य तस्मिन् यत्र तदाभाच्छास्त्रीयं विधीयते तदाश्रयमेव भवति व्याश्र
यत्वं नासिद्धं भवतीत्यर्थः इति यणोऽसिद्धत्वाद् आट् आयन् इङ् अध्ययने अध्यैत
इयङादेशः वृद्धिः यणादेशः अध्यैयाताम् अध्यैयत इक् अध्यैत अध्यैताम् इ

कापीप्सतीतिवा ॥ अधायन्प्रायापने अयात् अयाताम् लङः शाकटायन
स्यैतिवा जुस् तस्य पक्षे ताम् अकारान्ताद्धातोरुत्तरस्य जुसः एवं परयोः स्थाने एवं
रूपमेकादेशो भवति अयुः अयधाविदस्मानेअवेत् अवेताम् मिजन्यास्तवि
दाभ्यश्च ॥ सिचः अभ्यस्तसंज्ञकेभ्यः वेत्तेश्च ङित् लकारसंबन्धिनः झेः जुसादेशो
भवति अविदुः सिपधातो रुर्वा ॥ दश्च धातोः ॥ दकारस्य सिपि परतो वा रुर्भ
वति अवेः अवेद्वा अवित्तम् अवित्त अविदम् अविद्व अविद्म ॥ समविभुस
मविभ्रु समविदाताम् समविदता वेत्तेर्विभाषेति पक्षे रुट् समविद्रत अस
तवि अस्तिसिचो पृक्ते ॥ अस्तेरंगाङुत्तरस्य सिचः परस्यापृक्तस्य सार्वधातुका
स्य ईडागमो भवति आसीत् आस्ताम् आसन् असीः इत्यादि मृजूँ शुद्धौ अमार्ट् अमृ
ष्टाम् अमृजन् अमार्जन् वच भाषणे अवक् अवक्ताम् अवचन् तदिरु अश्रुवि
मोचने रुदः पंचभ्यः रुदादिभ्यः पंचभ्य उत्तरस्यापृक्तस्य सार्वधातुकस्य ईडाग
मो भवति अरोदीत् अरुदिताम् अरुदन् अरोदीः अरुदितम् अरुदित अड्भा
गिगालवयोः अरोदीत् अरुदन् अस्वपीत् अस्वपत् अस्वापिते अस्वपन् श्व
श्वसीत् अश्वसत् अप्राणीत् अप्राणत् अजक्षीत् अजक्षत् ति जक्ष्यत्येति रु

नुस् अजनुः जागृ निद्राक्षये जागोऽविचिण्णल्ङित्सु ॥ जागर्तेः विचिण्णल्ङिद्व-
र्जिते प्रत्यये परतः गुणो भवति हल्ङ्यादिलोपः अजागः अजागृताम् जुसि
चेति गुणः अजागरुः दरिद्रा दुर्गतौ अदरिद्रात् इद्दरिद्रस्येत्यइत् अदरिद्रि-
ताम् अदरिद्रुः चकासृ दीप्तौ ॥ दधि ॥ सकारान्तस्यागमस्य ते सार्वधातुके
परतः दकारादेशो भवति चर्त्वम् अचकात् अचकास्ताम् अचकासुः शा-
सु अनुशिष्टौ अशात् शास इदङ् हलोरिति इकारः शासिवसि अशिष्टाम् अशासुः वश
कान्तौ ग्रहिज्येति संप्रसारणमित्यस्य अत्रेति षत्वम् जश्त्वं चर्त्वं अवट् उष्टाम् उ-
शान् अवट् उष्टं उष्ट अवशम् उष्व उष्म ह्नुङ् अपनयने अह्नुत अह्नु-
वाताम् अह्नुवत् इत्यादयः अथ जुहोत्यादयः हु अजुहोत् ञिभी भये अ-
बिभेत् अबिभीताम् अबिभिताम् अबिभयुः ह्रीलज्जायां अजिह्रेत् अजिह्री-
ताम् अजिह्रियुः अददात् अदत्ताम् अददुः अदधात् अधत्ताम् अदधुः
निजिर् शौचपोषणयोः निजां त्रयाणां गुणः अनेनेक् अनेनिक्ताम् अनेनि-
जुः अनेनेक् अनेनिक्ताम् अनेनिक्ता नाभ्यस्तस्याचि पिति सार्वधातुके अ-
भ्यस्तस्यागमस्य लघूपधस्य अपि पिति सार्वधातुके गुणो न भवति अनेनिज

२५

धा॰ पा॰ १२२

112

न् अनेनिक्त अनेनिक्ताम् विजिर् पृथग्भावे अवेवेक् अवेविक्ताम् अवेविजुः
विष्लृ व्याप्तौ अवेवेट् अवेविष्टाम् अवेविषुः भृञ् अबिभः अबिभृताम् अ-
बिभरुः ऋ सृ गतौ । माङ् माने अमिमीत ओहाङ् गतौ अजिहीत ओहाक् त्यागे अ-
जहात् अजहीताम् अजहिताम् अजहुः ऋ गतौ इयः इयृताम् इयरुः पृ
पालनपूरणयोः अपिपः उदोष्ठ्यपूर्वस्येत्युत्वे रपरत्वे दीर्घः अपिपूर्ताम् अपिपरुः इति जुहोत्या-
दयः अदीव्यत् अदीव्यताम् अदीव्यन् स्वादिभ्यः श्नुः असुनोत् तुदस्य अतुद-
त् रुधिर् आवरणे रुधादिभ्यः श्नम् अरुणत् अरुंधाम् अरुंधन् दश्च दकारस्य रुः अरु-
णः अरुणत् भिदिर् विदारणे अभिनत् अभिंताम् अभिंदन् डिहिंसायाम् तृ-
णहम् इति इम् अतनोत् अक्रीणात् अक्रीणीताम् अक्रीणन् माङ्
योगे चाडागमप्रतिषेधः इत्याडागमप्रतिषेधः मा भवान् पेत् अयत् लोट् ॥ लो-
ट् च ॥ लोट् अत्यये भवति विध्यादिषु अर्थेषु ॥ एरुः ॥ लोडादेशानामिकारस्यो-
कारादेशो भवति शबादि कार्यं पूर्ववत् जयतु ॥ आशिषि लिङ्लोटौ तस्यो-
ङ्कारो गुणवृद्धिप्रतिषेधार्थः नानादेशार्थः जयतात् ॥ लोटो लङ्वत् ॥ लो-
टो लङ्वत्कार्यं भवति तामादयः सलोपश्च जयताम् जयन्तु ॥ सेर्ह्यपिच्च ॥

ऊ॰

लोडादेशस्य सेर्हिरादेशो भवति अपिच्च भवति विनोर्लुगित्यपि वक्तव्य ॥
अतो हेः अकारान्तादंगादुत्तरस्य हेः लुग्भवति जय जयतात् जयतम् जय
त मेर्निः ॥ लोडादेशस्य मेः ॥ निरादेशो भवति ॥ आडुत्तमस्य पिच्च ॥
लोट्संबंधिन उत्तमपुरुषस्य आडागमो भवति स चोत्तमपुरुषः पिच्च भवति
सवर्णदीर्घः जयानि जयाव जयाम ॥ हिन्योरुत्वप्रतिषेधो वक्तव्यः ॥ आ
मेतः लोट्संबंधिन एकारस्य आमादेशो भवति विजयताम् विजयेताम् विज
यन्ताम् ॥ सवाभ्यां वामौ ॥ सकारवकाराभ्यामुत्तरस्य लोट्संबंधिन एकार
स्य वश्चम् इत्येतावादेशौ भवतः विजयस्व विजयेथाम् विजयध्वम् एत ऐ
लोट्संबंधिन उत्तमपुरुषस्य एकारस्य ऐकारादेशो भवति विजयै विजयाव
